वर्षम् – ७०
चतुर्थोऽङ्कः
माघमासः
विक्रमाब्दः २०७६
युगाब्दः ५१२१
५ फरवरी २०२०

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
(१५ वर्षाणि)
१५००/–

प्रकाशन प्रत्येक माह की 1 तारीख



माघे वसन्तपञ्चम्यां गीतवादित्रविस्तरैः।
विद्याकलाद्यधिष्ठात्री पूज्यते हि सरस्वती॥

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | विनायकसहस्रसिद्धे | राजेन्द्र मोहन शर्मा | ६ |
| ३ | संस्कृतश्लोकमन्दाकिनी | डॉ. प्रमोदकुमारशर्मा | ७ |
| ४ | सौरपरिवार-संयुक्तपरिवारयोरन्तः सम्बन्धः | डॉ. विनोदकुमारशर्मा | ८ |
| ५ | त्रीणि मित्राणि | डॉ. हर्षदेवमाधवः | १० |
| ६ | हेमचन्द्राचार्यस्य मते योगस्य महत्त्वम् | डॉ. उषाकिरणयादवः | १२ |
| ७ | अस्माकं राजस्थानम् | डॉ. नानूराम जाट ( अध्यापक ) | १५ |
| ८ | तत्त्वं पूषन्नपावृणु | स्वामिविवेकानन्दसरस्वती | १६ |
| ९ | वैशेषिकदर्शने सृष्टिप्रलयप्रकारोपस्थापनम् | अजयकुमारकरः | १९ |
| १० | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | २३ |
| ११ | पाठकपरामर्श | डॉ. रघुवीरप्रसादशर्मा | २४ |
| १२ | अस्माकं गुरवः | वेणीमाधव गो. धर्माधिकारी | २५ |
| १३ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | २६ |
| १४ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २८ |
| १५ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३० |
| १६ | संस्कृत समाचारः | भुवनेशव्यासः, प्रान्तसहमन्त्री | ३४ |
| १७ | संस्कृत समाचारः | प्रबन्धसम्पादकः | ३५ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

दूरभाषः 0141–2379014, मो. 9783105699

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठं सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्दगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठं रेवासा )
स्वामी संवित् सोमगिरिः
( बीकानेरम् )
महन्तः प्रतापपुरी
( तारातरामठं बाडमेरम् )
श्री दामोदरप्रसादमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रो. श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामाशर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकौ
डॉ. स्नेहलताशर्मा
डॉ. पवनव्यासः

भारतीयसंस्कृतप्रचारसंस्थानम्

अध्यक्षः
प्रो. शंकरप्रसादशुक्लः

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूका

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

वर्षम् 70 अङ्कः -4
माघमासः
विक्रमाब्दः 2076
फरवरी, 2020

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 120/-
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- ( 15 वर्षाणि )

सम्पादकीयम्

# आदर्त्तव्यो नागरिकतासंशोधनाधिनियमः

...✍ प्रोफेसर श्रीकृष्णशर्मा

भारतराष्ट्रस्य विभाजनं धर्मम् आधारीकृत्य विहितमासीत्। विभजनानन्तरं पाकिस्तानस्य पूर्व-पश्चिमभागयोर्धार्मिकाल्पसङ्ख्यकैर्निरन्तरं धार्मिकोत्पीडनमनुभूतम्। अतः पाकिस्तानदेशस्य पूर्वापरभागाभ्यां शरणार्थिनां भूयसी सङ्ख्या भारतं प्रत्यागन्तुं विवशाऽभवत्। भारतीयसंविधाननिर्मातृणां कृते शरणार्थिनो नागरिकताप्रदानस्य प्रारूपं प्रस्तोतुं दुष्करमिवाऽऽसीत्। भारतीयसंविधानं (भागः II, अनुच्छेदः-11) भारतीयनागरिकताप्रदानार्थं प्रतिनिधिसभां (Parliament) विस्तृतरूपरेखां प्रस्तोतुं विशेषाधिकारं प्रयच्छति। अस्माद् हेतोः संविधाने 'नागरिकताधिनियम 1955' इत्यस्यास्तित्वमभवत्।

भारत-पाकविभाजनानन्तरम् 'नेहरू-लियाकत-सन्धिः' इत्यभिधानेन यदैकमत्यम् अभवत्, तत्रैतन्निर्धारितमासीद् 'यदि मूलदेशोऽल्पसङ्ख्यकानां सुरक्षाप्रदाने विफलो भवति, तदा नैसर्गिकरीत्या प्रताडिताः स्वस्वदेशमाश्रयितुं प्रभवा भविष्यन्ती'ति।

इदानीं भारतवर्षस्य सीमावर्तिषु पाकिस्तान-बांग्लादेश-अफगानिस्तानमुस्लिमराष्ट्रेषु अल्पसङ्ख्यकानां जनसंख्यायाम् अतिशयन्यूनता सञ्जाता। मन्यते यत् तेऽल्पसङ्ख्यका घातिताः, हठाद् धर्मपरिवर्त्तनं कारिताः अथवा प्रताडिताः सन्तस्ततः पलायिता भूत्वा भारते शरणमागताः। अतश्चैतादृशानामल्पसंङ्ख्यकानां प्रपीडितानां संरक्षणार्थं संविधानप्रदत्तविशेषाधिकारमाश्रित्य 'नागरिकताऽधिनियम, 1955' मध्ये भारतसर्वकार आवश्यकं संशोधनं कर्तुं प्रयतितवान्।

अस्माकं देशो धर्मनिरपेक्षः। अत्र समेषां धर्मावलम्बिनां स्व-स्वधर्मपालने स्वातन्त्र्यम्। अल्पसङ्ख्यकानामत्र जनसङ्ख्यायां भूयसी वृद्धिरुत्तरोत्तरं जायत इत्यस्ति स्वातन्त्र्ये प्रामाण्यम्। पाकिस्तानप्रभृतयस्त्रीण्यपि राष्ट्राणि इस्लामिकधर्मप्रधानानि। तत्राल्पसङ्ख्यकानाम् इस्लामधर्मेतरधार्मिकाणां विभजनकालादनतिचिरादेव तत्र जीवनं दुष्करं सञ्जातम्।

अत्रेदं महत्प्रामाण्यमवगम्यताम्- स्वतन्त्रभारतवर्षस्य प्रथमो विधिमन्त्री डॉ. भीमराव अम्बेडकर आसीत्। स च 'दलित' वर्गस्य नेताऽऽसीत्। पाकिस्तानदेशस्य प्रथमो विधिमन्त्री श्रीजोगेन्द्रनाथमण्डल आसीत्। सोऽपि 'दलित' आसीत्। भारतविभजनकाले स मण्डलमहोदयः 'पाकिस्तान' नाम्ना पृथग् राष्ट्रोदयाय न केवलं मुक्तकण्ठेन समर्थनं कृतवान् आसीत्, सहैवानेन असमप्रदेशस्य 'सिलहट' जनपदे जनमतसङ्ग्रहावसरे अनुसूचित-जातिसमुदायं मुस्लिमलीगपक्षे मतदानकरणाय सम्प्रेरितवान्। स एव तत्रत्यः प्रथमो विधिमन्त्री 'नेहरू-लियाकत' सन्धेः षण्मासानन्तरमेव 08-10-1950 दिनाङ्के पाकिस्तानमन्त्रिमण्डलात् त्यागपत्रं प्रदत्तवान्। कारणं किमासीत्? श्रूयताम्। पाकिस्तानस्य पूर्व-पश्चिमभागयोः मुस्लिमधर्मावलम्बिभिन्नधर्मावलम्बिषु हिन्दु-सिख-प्रभृतिषु कट्टरपन्थिभिः भयावहा हिंसा क्रियते-इति त्यागपत्रे तेन मण्डलमहोदयेन कारणं प्रदत्तम्। दौर्भाग्यात् स मण्डलो वस्तुतो धर्मनिरपेक्षं भारतं प्रत्यागतवान् शरणार्थिरूपेण। शरणार्थित्वेनैव स पश्चिमबंगालप्रान्ते मृत्युंगतः।

अतश्च 'नेहरू-लियाकत' सन्धेः परिपालने पाकिस्तानस्य वैफल्यात् विभजनानन्तरं पीडितानामल्पसङ्ख्यकानां शरणप्रदानं भारतशासनस्य संवैधानिकं कर्तव्यं भवति।

अतः भारतसर्वकारेण प्रस्तुतं नागरिकता (संशोधन) विधेयकं लोकसभया 09-12-2019 दिनाङ्के राज्यसभया च 11-12-2019 दिनाङ्के स्वीकृतम्, तदनन्तरं च भारतस्य महामहिमराष्ट्रपतिभिः श्रीरामनाथकोविन्द-महोदयैरपि 12-12-2019 दिनाङ्के स्वहस्ताक्षराणि विधाय विधेयकमिदमङ्गीकृतम्। अधुना तद्विधेयकम्

'अधिनियमः' (Act) सञ्जातः। अयमधिनियमः 10-01-2020 दिनाङ्के शुक्रवासरे भारतसर्वकारस्य गृहमन्त्रालयेन अधिसूचनया (Notification) प्रसारितः। इत्थं 'नागरिकता (संशोधन) अधिनियमः (C.A.A.)' सम्पूर्णे भारतराष्ट्रे किञ्चिदवान्तरराजनीतिक विरोधे सत्यपि उपयोगविषयो (Applicable) जातः। फलतः 'यू.पी. में आए पाकिस्तान-अफगानिस्तान-बांग्लादेश के शरणार्थियों की आप बीती' इति नाम्ना उत्तरप्रदेशराज्येन चत्वारिंशत् (40) सहस्रसङ्ख्यक-प्रवासिनां (शरणार्थिनाम्) अवगतिः केन्द्रसर्वकाराय सम्प्रेषितेति नागरिकसंशोधनाधिनियमस्योपयोगाय कटिबद्धता प्रदर्शिता।

अस्मात् संशोधनात्पूर्वं 'नागरिकताधिनियम-1955' इत्यस्य 'धारा-5' इत्यनुसारं भारतीयमूलस्य प्रवासिनो जनाः भारतस्य नागरिकताप्राप्त्यर्थं आवेदयन्ति स्म। परं भारतीयमूलतां प्रमाणयितुं यदि तेऽसमर्था भवन्तिस्म, तदोक्ताधिनियमस्य 'धारा-6' इत्यनुसारं 'प्राकृतिकी-करण' (Naturalization) द्वाराऽऽवेदनाय कथ्यन्ते स्म। अस्यां जटिलप्रक्रियायां शरणार्थिनो बहुभिरवसर-प्रापणीयैर्लाभैः वञ्चिता भवन्ति स्म। अतः 'नागरिकता-धिनियम-1955' इत्यस्य तृतीयायाम् अनुसूच्यां संशोधनं विधाय 'प्राकृतिकीकरण' (Naturalization) प्रक्रियया नागरिकताप्रदानाय सुकरः पन्थाः निर्धारितः। पूर्वमेकादश (11) वर्षाणि यावत् भारते निवासः प्रमापणीय आसीत्, अधुना पञ्च (5) वर्षाण्येव भारतदेशे शरणार्थिरूपेण निवसनमावश्यकम्, अथ च यस्माद् दिनाद् निवास आरभ्यते, तद्दिनादेव नागरिकता प्रदास्यत इत्यपि महत् संशोधनम्। अनया प्रक्रियया कोटिसङ्ख्यकाः शरणार्थिनस्त्वरितमेव लाभान्विता भविष्यन्तीत्याशास्महे।

अनेन संशोधनेन के के लाभान्विता भविष्यन्तीति ज्ञेयमित्थम्-पाकिस्तान-बांग्लादेश-अफगानिस्तान-मुस्लिमबहुलदेशेभ्यो धार्मिकोत्पीडनवशात् 31-12-2014 दिनाङ्कं यावद् भारतम् आगता हिन्दु-सिख-जैन-बौद्ध-पारसी-ईसाई धर्मावलम्बिनोऽल्पसंख्यकास्ते भारतीयनागरिकताप्राप्त्यै आवेदनकरणाय पात्राणि भविष्यन्तीत्येतदर्थमपि संशोधनम्।

अनेन संशोधनेन भारतवर्षस्याल्पसङ्ख्यकानां मुस्लिमधर्मावलम्बिनां कृते न काऽपि क्षतिः। येऽत्र राष्ट्रविभजनकालादेव भारतमाश्रितवन्तस्तेऽस्य देशस्य स्थायिनिवासिनः नागरिकाश्च सन्तीत्यत्र न कोऽपि सन्देहः। यतोऽयमधिनियमोऽल्पसङ्ख्यकानां प्रपीडितानां कृते नागरिकताप्रदानार्थं संशोधितः, न त्वत्र निवसतामल्पसङ्ख्यकानां नागरिकतापहरणार्थमिति निश्चयेन ज्ञेयम्। अस्याधिनियमस्य स्वीकृत्यनन्तरम-ज्ञानवशात् कुत्सितराजनीतिवशाच्च पूर्वोत्तरप्रदेशेषु जनान्दोलनान्यपि प्रादुरभूवन् यत्तेषां हितेषु कुठाराघातः क्रियत इति। किन्तु नैवम्। पूर्वोत्तरराज्येषु अस्याधि-नियमसंशोधनस्योपयोग एव न भविष्यतीति संशोधन एव स्पष्टं वर्तते। वस्तुस्थित्यवगमनानन्तरं तत्रान्दोलनं निर्मूलप्रायं जातमिति सन्तोषावहम्।

यदि 'नागरिकताधिनियम-1955' इत्यस्य 'धारा-6' इत्यनुसारं पात्रतां धारयति, तदाऽधुनापि कस्यापि देशस्य धर्मस्य वाऽवलम्बी कोऽपि विदेशी नागरिको भारतीयनागरिकताप्राप्त्यै आवेदनं कर्तुं शक्नोतीति पूर्वतः प्रचलितो नियमोऽधुनापि संरक्षितः अतो विगतपञ्चवर्षेषु 566 सङ्ख्यकेभ्यो मुस्लिमधर्मावलम्बिभ्योऽपि नागरिकता प्रदत्ताऽस्तीति स्पष्टीकृतं केन्द्रीयगृहमन्त्रिणा प्रस्तुतविधेयके।

अनेनेदं स्पष्टं यदस्मिन् संशोधितेऽधिनियमे पाकिस्तान-बांग्लादेश-अफगानिस्तानदेशेषु प्रताडितेभ्यो हिन्दु-सिख-जैन-बौद्ध-पारसी-ईसाई धर्मावम्बिभ्यो-ऽल्पसङ्ख्यभ्यो भारतदेशस्य नागरिकताप्रदानार्थमयं दायित्वनिर्वाहकोऽधिनियमो न कस्यापि हानिकरो, न वा पूर्वतः प्रचलितनियमस्य विध्वंसकरः। यत्र कुत्रचित् संशीतयोऽभवन् तासां निराकरणं जनप्रतिनिधिभिः करणीयमित्यलम्।

(गताङ्कादग्रे)

# विनायकसहस्रसिद्धे

❑ पं. राजेन्द्रमोहनशर्मा

विनायकः स्वदशां दृष्ट्वाचिन्तयत् कथमित्त्थं संभवं यत् विनैवापराधं कोऽयं मामुत्थाप्यात्रानीय बबन्ध अगच्छच्च। किञ्चित् कालानन्तरं विनायकः स्वशरीरं वज्रतुल्यं विधाय स्वकीयबलेन बन्धनं त्रोटयित्वा उदतिष्ठत्। प्रस्तरस्य नन्दीं दृष्ट्वा विनायको जहास। त्वमत्रापि मां न जहासीद् अस्तु त्वां तु पश्चाद् द्रक्ष्यामीति मनसि कथयन् विनायकः शीघ्रगत्या मन्दिरमगच्छत्। स पूर्णरूपेण सावधानोऽभवत्। स कामपि त्रुटिं न चिकीर्षतिस्म येन पुनः कोऽपि प्रत्याक्रमणं कुर्यात्। सावधानीपूर्वकं चलन् विनायकोऽपश्यत् द्वौ कृष्णौ पुरुषौ तस्याग्रे प्रचलतः। स तौ दृष्ट्वा स्तम्भस्य पृष्ठे स्थितोऽभवत्। परन्तु शीघ्रता-वशात् विनायकस्य पादः स्तम्भेनाघर्षयत्। ध्वनिं श्रुत्वा द्वावपि कृष्णमूर्ती शीघ्रमेव पृष्ठेऽभ्रमताम्। तौ-अनुभूतवन्तौ यत् समीपे कोऽपि विद्यते। इतस्ततः पश्यन्तौ तौ शीघ्रमेवाग्रेऽगच्छताम्। विनायकः पादाग्रभागेनोच्छलत् शीघ्रमेव दूरस्थस्तम्भस्य पृष्ठेऽतिष्ठत्। द्वौ कृष्णपुरुषौ शीघ्रमेव बहिरगच्छताम् यत्र किञ्चित् समयपूर्वमेव विनायकमबध्नात्।

ताविदं दृष्ट्वाऽऽश्चर्यचकितावभूताम् यत् कोऽपि तयोः रज्जुबन्धनात् निःसृत्यागच्छेत्। अद्यावधि इमौ यं बबन्ध स प्राणान्त एव मुक्तोऽभवत्। तावन्वभवतां यत् स कोऽपि चतुरः शक्तिशाली च विद्यते यो बन्धनमुक्तेः कौशलं जानाति। परन्तु तौ यस्य रक्षायै तत्र नियोजितौ यदि तस्य किञ्चिदशुभं जायेत तर्हि केन मुखेन प्रजापतिसमीपं यास्यतः। तौ परस्परं संवदतः स्म तदैव शीघ्रं विनायकः जूटमुञ्जायां तावबध्नात्। यावत् तौ सावधानौ जायेताम् तावत् तु विनायकः सम्पूर्णरूपेण बध्वा मूर्तिरूपे पर्यणमत्। विनायकस्तयोः शरीरात् वस्त्राणि गृहीत्वा मुखाक्षिसहितं सम्पूर्णां मुखाकृति-मेवाच्छादयत्। अन्ते च-एकस्मिन् शिलाखण्डस्य निम्नभागे तयोरुपरि प्रबलं प्रहारं विधाय हसन् परावर्तत।

प्रत्यागत्य विनायकोऽपश्यत् यत् बहिरेकः सुसज्जितो रथो विद्यते तस्य सारथी निद्राघूर्णितस्तत्रोपाविशत्। विनायकोऽविचारयत् यदेषः स्यन्दनोऽवश्यमेव कस्यापि राजपरिवारस्य विद्यते। यौ स बहिर्बध्वागच्छत् तौ निश्चितरूपेणास्याङ्गरक्षकौ स्याताम् परन्तु विनायकः नाजानात् यदस्यां रात्रौ कोऽपि एकाकी अस्मिन् मन्दिरे समायास्यति किं च विधास्यति?

विनायकोऽत्यन्तमुत्कण्ठितः संजातः। स पुनः तीव्रगत्या प्राचलत्। मन्दिरस्य चत्वारि द्वाराणि परिक्रम्य पञ्चमद्वारे प्रवेशावसरे पुनः नूपुरध्वनिमशृणोत्, विनायकः किञ्चित् तस्थौ सहसा स गर्भगृहस्य सम्मुखस्थे प्राङ्गणेऽस्पष्टां सप्तरंगीं छायामपश्यत्। विनायकः सावधान एकतोऽतिष्ठत्। सः पूर्णरूपेण तल्लीनो भूत्वा छायायाः गतिविधिमपश्यत्। चपलगत्या विभिन्ननृत्य-मुद्रासु लीना छाया अनवरतमनृत्यत् श्रान्ता नैव जाता। विनायकः विस्फारितनेत्राभ्यां तत् सर्वमपश्यत्। विनायकः स्वयमपि कुशलो नर्तक आसीत् परन्तु स अस्या नृत्याङ्गनाया मुखं हावभावं वस्त्रविन्यासं रंगसंयोजनादिकं सम्यक्तया परीक्षितुं न शशाक। यतोहि तस्या नृत्यगतिस्तीव्रतरा अविद्यत मन्ये भयानके आकाशीयझञ्झामध्ये कापि विद्युद्रेखाऽद्योतत। नृत्याङ्गनाया मुखावलोकनाय स बहु प्रायतत् परन्तु विनायकस्तस्याः पादावधि द्रष्टुं न शशाक याभ्यां नूपुरस्य वशीकरणध्वनिर्निस्सरतिस्म।

विनायको यन्त्रवदतिष्ठत्। कोऽस्य मन्दिरस्याधिष्ठाता वर्तते अधिपतिश्च को विद्यते इति अपि नैवाजानात्। निशायाः प्रहरत्रयं कदा व्यतीतमित्यपि स नाजानात्। अधुना स चक्षुषी परामृज्य यथार्थं ज्ञातुं प्रायतत। स स्वकीये वामहस्ते चकोटिं विधायात्मानं परीक्षितवान्, मन्दिरमध्ये यत् चपलं विद्युत्प्रवाहं प्रचलतिस्म तत् सहसावरुद्धं संजातम्। तत्र पूर्णरूपेण निस्तब्धता संजाता। विनायको गर्भगृहस्थां मूर्तिमदृष्ट्वैव पुनः पृष्ठे प्राचलत्। परन्तु बहिरागत्य यदपश्यत् तेन स आश्चर्यचकितः संजातः। तत्र न रथ आसीत् न च शिलाखण्डे बद्धो नन्दी। विशालकायस्य नन्दिनो मूर्तिलोपः अस्मिन् विशिष्टश्चमत्कारः। विनायको मन्दिरं परितोऽभ्रमत्। दूरं यावत् रथस्य चिह्नान्यन्वेषयत्। विनायकोऽन्वभवत् यथा स रथः केनाप्याकाशमार्गेण परावृत्तः। स्वयमपि स्वप्नात् जागरितः संजातः। न तस्य कोऽपि प्रारंभः बुद्धौ समागच्छत्, न च कापि कथा बुद्धिप्रकोष्ठे समायातिस्म। विलुप्तां ज्योत्स्नामुदितं सूर्यं च दृष्ट्वा स स्वस्थाने गन्तुमना संजातः। यावत् योजनद्वयं मार्गमतिचक्राम तावदेव मार्गे पतितां तां रज्जुमपश्यत् यया स द्वौ कृष्णपुरुषौ अबध्नात्। स आश्चर्येऽपतत्। तस्य समीप एव द्वे सिन्दूररंगरंजिते अंग- वस्त्रे पतिते आस्ताम्। वस्त्राणि धूलिधूसरितानि आसन्। विनायकः परितः सावधानतया अपश्यत् परन्तु न कोऽपि तत्र दृष्टिपथमागतः। विनायकः सम्यक् अवागच्छत् यत् तौ द्वौ कृष्णपुरुषौ अगच्छताम् यौ बद्ध्वा निशि अहमत्र प्राक्षिपम्।

**( प्राचार्यः )**
**पुरानी बस्ती, चांदपोल बाजार, जयपुर**

**प्रश्नोत्तरप्रवाहिनी व्याकरणशास्त्रीया**

# संस्कृतश्लोकमन्दाकिनी

❑ **डॉ. प्रमोदकुमारशर्मा**

**के सेधिष्यन्ति लोकेऽस्मिन् कः सिषेध च केऽसेधन्?**
**नदः सेधति को नैव सत्यं वदतु हे सखे!।। 1।।**

**रामः सिषेध कृष्णश्च सत्यवादी युधिष्ठिरः।**
**सेधिष्यन्ति च नेतारः नासेधन्नलसाः जनाः।। 2।।**

**नरः सेधति यत् पापं गंगा तदपसेधति।**
**मनः सेधति यत्तापं त्यागस्तदपसेधति।। 3।।**

**जन्म सम्प्राप्य लोकेऽस्मिन् विधिना सम्प्रचोदितः।**
**जनाः सेधन्ति कार्येषु समस्ते जीवने भुवि।। 4।।**

**बाल्यक्रीडादिकार्येषु बाल्यचापल्यकर्मसु।**
**सेधन्तं च शिशुं दृष्ट्वा जननी च निषेधति।। 5।।**

**विद्याध्ययनकार्येषु निश्चितनित्यकर्मसु।**
**सेधन्तं पुत्रकं दृष्ट्वा जनको न निषेधति।। 6।।**

**अनुचितेषु मार्गेषु प्रतिकूलक्रियासु च।**
**सेधन्तं बालकं दृष्ट्वा जनकः प्रतिषेधति।। 7।।**

**विप्रतिषेधकार्येषु पाणिनिः परमिच्छति।**
**पतञ्जलिरभीष्टं हि कार्यं कर्तुं च सेधति।। 8।।**

**कर्णमुद्घाट्य शृण्वन्तु बालानामभिभावकाः।**
**सन्मार्गान्न निषेधन्तु चात्मजान् बालकान् प्रियान्।।9।।**

**सर्वक्षेत्रेषु पूज्यैस्तैः ऋषिभिर्ज्ञानवर्धितः।**
**सेधेद् देशोऽयमस्माकमऽग्रेऽग्रे च पुनः पुनः।। 10।।**

व्याकरणविभागाध्यक्षचरः, व्याकरणविभागे सहाचार्यः,
ज. रा. रा. संस्कृत विश्वविद्यालयस्य,जयपुरस्थस्य

# सौरपरिवार-संयुक्तपरिवारयोरन्तः सम्बन्धः

❑ डॉ. विनोदकुमारशर्मा

मरीचिनामकेऽस्माकं ब्रह्माण्डे कश्यपनीहारिकायाः अदितिभागे स्थितस्यादित्यमण्डलस्य ततस्समुद्भूतस्य तस्य परिवारस्य नाम सौरपरिवारस्य ये सूर्यचन्द्रमंगल-बुधगुरुशुक्रशनैश्चरा ग्रहास्सन्ति ते भारतीयकुटुम्ब-व्यवस्थायाः संयुक्तपरिवारस्यावधारणाया एव समष्टि-रूपास्सन्ति। यथा सूर्यपिण्डादुत्पन्नपरिवारजनानां ग्रहाणां सर्वेषामेवैकपिण्डादुत्पत्त्यापि गुणधर्माकृतिप्रभाव-प्रकाशगतिस्थित्यादिषु भिन्नता सत्यपि तेषु परस्परं घनिष्ठः सम्बन्धो भवत्येव, तथैव संयुक्तपरिवारेऽपि पूर्वजपरम्परया समुत्पन्नप्रपितामह-पितामह-पिता-पितृव्य-भ्राता-भगिनी-पुत्र-पुत्री-पितृश्वस्रादीनां परिवारः, जनानां माता-पितामही-पुत्रवधूप्रभृतीनां चापि सदस्यानां समवायेन सौरपरिवारसममेव परस्परं प्रगाढः सम्बन्धो भवति।

'यत् पिण्डे तद् ब्रह्माण्डे' इति श्रुतिवचनाद्यत्किञ्चि-दपि ब्रह्माण्डे दृक्पथमायाति तदखिलं पिण्डेऽप्यनुभव-पथमवतरति। आकाशीयघटनानां साक्षात् पिण्डेऽपि प्रभावोऽवलोक्यते। महदन्तरिक्षे उल्काधूमकेतुग्रहण-ग्रहयुतिग्रहयुद्धसमागमपूर्णिमामादीनां दर्शनस्थिति-प्रकाशावस्थानां भूवासिजनानां परिवारजनानामुपर्यपि साक्षात्पतत्येव। अत एव तास्ववस्थासु जनाः सुखदुःखपीडारोगकष्टादीनामनुभवं कुर्वन्तः प्रत्यक्ष-मवलोक्यन्ते किल। अत एवेदं तथ्यमप्यत्र सिद्धं भवति यत् सौरपरिवारसंयुक्तपरिवारयोर्मध्ये विद्यते सम्बन्ध-विशेषः, परस्परं पूरकत्वं तथा चान्योन्याश्रयत्वमिति।

ज्योतिषशास्त्रे सूर्यादिग्रहाणां राजादिसंज्ञाः पिता-मातादिसंज्ञाश्च बहुधा विपश्चिद्भिरुक्ताः। तद्यथा-

**''विप्रौ जीवसितौ दिनेशरुधिरौ भूपालकौ वैश्यराड्।**
**इन्दुः शूद्रकुलाधिपः शशिसुतो मन्दोऽवराणां पतिः।।''**

(जातकपारिजातः 2/26)

**''सूर्यात्.. पिता.. चन्द्रात्.. जननी.. भौमात्.. अनुजाः.. बुधात्..मातुलसुहृत्..गुरुणा..आत्मजा..शुक्रात्.. पत्नी.. शनिना सम्पत्तिः राहुणा पितामहः केतुना मातामहः..।''**

(जातकपारिजातः 2149, 50)

**''भगिन्यारतः श्यालः कनीयान् जननी चेति।**
**मातुलादयो बान्धवो मातृसजातीया इत्युत्तरतः।**
**पितामहः पतिपुत्राविति गुरुमुखादेव जानीयात्।**
**पत्नी पितरौ श्वसुरौ मातामहा इत्यन्तेवासिनः।''**

(जैमिनिसूत्रम् 1/1/20-30)

एवममुना प्रकारेण ज्यौतिषे ग्रहाधारेण परिवारजनानां विचारः क्रियते, तद्यथा -

सूर्यः = पिता, पालकः, प्रशासकः।

चन्द्रः = माता, स्वामिनी, पालयित्री।

मंगलः = भ्राता, सहोदरः, भगिनी, श्यालः।

बुधः = मातुलादयः, मातृसजातीयाः, शिशवश्च।

गुरुः = आचार्यः, पितामहः, शिक्षितः, उपदेशकः।

शुक्रः = पत्नी, स्त्री, कन्या, सामान्यतः श्वसुरौ चापि।

शनिः = दासः, सेवकः, वृद्धजनः।

राहुः = पितामहः, सम्बन्धिनः।

केतुः = मातामहः।

यथा सूर्यादिग्रहैरस्माकं शरीरं प्रभावितं भवति तथैव शरीरकृतैः व्रतोपवासस्नानदानरत्नधारणमंत्रजपानुष्ठा-

नयज्ञयागादिभिः नभोमण्डलवर्तिग्रहाः अपि निश्चयेन प्रभाविताः शुभफलदाश्च भवन्ति। सूर्योपासनया जलार्घ्यदानेन तद्व्रतोपवासमन्त्रादिकर्मणा न केवलं सूर्योऽनुकूलतां भजतेऽपितु पितुरनुकम्पापि वर्धते। सूर्योपासनया यादृक् फलमवाप्यते तदेवाखिलं ततोऽप्यधिकं च पितुः सेवया सम्प्राप्यते।'पितृदेवो भव' इत्युपदेशानुसारेण पितुस्सेवया पितुराज्ञापालनेन पितुरनुकम्पया पितृभक्त्या च श्रीरामवत् सर्वसमृद्धो भवति मनुष्यः।

एवमेव चन्द्रोपासनया यादृशममृतमयफलमवाप्यते तादृशमेव ततोऽप्यधिकं च मातुस्सेवया मातुराज्ञापालनेन, मातुरहैतुकीकृपया तदाशिषा च सहजतयैव प्राप्तुं शक्यते। न केवलं मातुस्सेवया चन्द्रोपासनाजन्यफलमेवावाप्यते-ऽपितु तेन स्वजन्मकुण्डल्यां यदि चन्द्रो दुर्बलोऽस्ति तदा सोऽपि सबलो भूत्वा शुभफलानि दिशति।

एवमेवाध्यात्मज्योतिषाधारेण भ्रातृवर्गे स्नेहेन, भगिनीनां समादरेण, श्यालकैस्सह स्नेहभावेन मंगलः पुष्टतां याति। अनेन भौमजन्यदोषनाशो भवति तथा च सुफलप्राप्तिश्च भवति।

शिशुबालकेषु प्रीत्या, मातुलादीनां शुभाशिषा च बुधकृद्दोषाणां नाशो भवति, बुधः शुभो बलिष्ठश्च भूत्वा शुभफलदाता च भवति। शिक्षकाचार्यगुरुजनोपदेशक-सन्तपूज्यजनानां च पदसेवया शुभाशिषा कृपाभावनया च सहजतयैव राजयोगसदृशं पुण्यफलं सुखैश्वर्यादिफलं च प्राप्तुं शक्यते। गृहस्त्रीपत्नीकन्याप्रतिवेशिन्यादिनारीभि-स्सह स्नेहसौहार्दसम्मानभावेन तासां प्रति औदार्यभावेन तासां कृपया च शुक्रग्रहफलं सहजतया प्राप्यते। अनेन शुक्रोऽपि सबलो भवति, विना हीरकधारणेनैव शुक्रसुफलमपि सर्वांशतया च प्राप्तुं शक्यते। एवमेव परिचारकसेवकानुचराणां प्रति करुणाभावनया, दयाभावनया, वृद्धरुग्णजनसेवया च शनैश्चरदोषनिवारण-शान्तिं विनैव शनिकृतारिष्टं नष्टं भवति तत्सुफलं च जीवने सम्प्राप्यते।

एवं प्रकारेण संकेतेन सारांशतयात्र विचार्यते चेत् संयुक्तपरिवारे परस्परं सौमनस्येन समाजे च परस्परं सामरस्येन सद्भावपूर्णव्यवहारेण च सर्वविधं शुभफलं प्राप्तुं शक्यते, ग्रहदोषान्निवारयितुं शक्यते, ग्रहान् चापि बलीकर्तुं शक्यते। अतो लोककल्याणायात्मनोऽभ्युत्था-नाय ज्योतिषशास्त्रोक्तधिया संयुक्तपरिवारो दृढो भवेत्। प्राचीनभारतस्य कुटुम्बव्यवस्थाया इदमेव रहस्यमासीत् शमित्योम्।।

**सह-आचार्यः, ज्योतिषविभागे**
**जगद्गुरुरामानन्दाचार्य-**
**राजस्थानसंस्कृतविश्वविद्यालयः, जयपुरम्**

**सादरमनुरोधः**

# जन्मशताब्दीविशेषाङ्कः

**अप्रेल 2020, मासे भारतीसंस्कृत-मास-पत्रिकायाः संस्थापकानां स्वर्गीय-श्रीगिरिराजशास्त्रि (दादाभाई) महोदयानां जन्मशताब्दी-विशेषांकः प्रकाशयिष्यते। दादाभाईमहोदयस्य स्मृतिविषयकानां संस्कृतलेखानां 15 फरवरी 2020 पर्यन्तं सम्प्रेषणाय भवन्तोऽनुरुद्ध्यन्ते।**

बालकथा

# त्रीणि मित्राणि

❏ डॉ. हर्षदेवमाधवः

एकस्य वटवृक्षस्य कोटरे एकः शुकः वसति स्म। तस्य नाम हारीतः आसीत्। सः प्रतिदिनं रामस्य नाम अजपत्। वनं गत्वा सः फलानि खादित्वा रात्रौ वटवृक्षे अस्वपत्।

एकदा तत्र एकः वायसः आगतः। सः अपि वटवृक्षे वस्तुम् अवाञ्छत्। तरुकोटरस्य पार्श्वस्थायां शाखायां सः उपविष्टः। तं दृष्ट्वा हारीतः अपृच्छत् 'भ्रातः! त्वम् अत्र वस्तुम् इच्छसि किम्?' तदा वायसः अवदत्, 'अथ किम्। अयं वटवृक्षः विशालः हरितः सुरक्षितः च। अतः अत्र एव निवासं कर्तुं मे इच्छा वर्तते। हारीतः अवदत्' 'साधु, साधु। आगच्छ, अहम् अन्यत्र कमपि वृक्षं मम कृते मार्गयिष्यामि।' वायसः अवदत्, 'कस्मात्? अहं तु शाखायां वत्स्यामि। त्वं तु कोटरे वससि?' हारीतः अवदत् 'त्वं कदापि न स्नासि, उच्छिष्टं मलिनं च खादसि। त्वं मम प्रतिवेशी भवसि। अतः अहम् एनम् वृक्षं त्यक्त्वा अन्यत्र गमिष्यामि। मलिनमित्रं मह्यं न रोचते।' वायस अवदत्, 'मा चिन्तां कुरु अहं प्रतिदिनं स्नानं करिष्यामि। मन्दिरं गत्वा देवस्य दर्शनं करिष्यामि। शुद्धम् अन्नं खादिष्यामि। त्वं तु सज्जनः। अहम् अपि सज्जनः भविष्यामि।'

हारीतः अवदत्, 'तर्हि वयस्य! आगच्छ। स्वागतं तव। किन्तु तव नाम किम्?'

वायसः अवदत्, 'मम नाम कुशलः। अहं डयने कुशलः, कार्येषु चपलः। अहं भयं पूर्वम् एव जानामि। अतः तव रक्षणं करिष्यामि।'

हारीतः अवदत् 'साधु, साधु! त्वं कुलायं रचय। अहं तव साहाय्यं करिष्यामि।' हारीतकुशलौ मिलित्वा कुलायस्य रचनाम् अकुरुताम्। कुशलः प्रतिदिनं स्नानं करोति स्म। मन्दिरं गत्वां सः देवं प्रणमति स्म। मन्दिरस्य प्राङ्गणे जनाः विहगेभ्यः अन्नकणान् विकिरन्ति स्म। तेन तयोः जीवननिर्वाहः भवति स्म। कश्चित् कालः व्यतीतः। एकदा शुकः पुनः अपि चिन्तया व्यग्रः अभवत्। एकं भूतं तम् एव वृक्षं प्रति आगच्छति स्म। भूतं वटवृक्षं दृष्ट्वा प्रसन्नम् अभवत्। भूतम् उच्चैः विहस्य अवदत्, 'अहम् अस्मिन् वटवृक्षे निवासं करिष्यामि। अयं वटवृक्षः विशालः, हरितः, छायया शीतलः च।' भूतं शुकं विलोक्य अवदत्, 'मित्र! त्वं सज्जनः असि, अतः अहं तव प्रतिवेशी भविष्यामि।' हारीतः अवदत्, 'मित्र, त्वम् अत्र निवासं कुरु। अहम् अन्यत्र गमिष्यामि।' भूतम् अपृच्छत्, 'कस्मात्?' हारीतः अवदत्, 'भ्रातः! त्वं मलिनं खादसि। तव रूपम् अपि मलिनम्। त्वया सह मम निवासः न शक्यः। त्वं स्नानम् अपि न करोषि।' भूतम् अवदत्, 'मित्र, मा चिन्तां कुरु। अहं प्रतिदिनं स्नानं करिष्यामि। अहं सायंकाले भूतबलिम् एव खादिष्यामि। किन्तु अहं रूपं तु त्यक्तुं न समर्थः। तथापि अहं रूपं परिवर्त्य निवासं करिष्यामि। अहम् अस्य वृक्षस्य उपरि कोटरे निवासं करिष्यामि। त्वं भयं त्यज। मम नाम विरूपः। अहं भूतराजः। अहं सर्वेषां रक्षणं करिष्यामि।' – इत्थं हारीतः कुशलः विरूपः च – त्रीणि मित्राणि तस्मिन् वटवृक्षे निवसन्ति स्म।

एकदा कुशलः भोजनार्थं गगने डयते स्म। सहसा एका चिल्लिका तेन सह समघट्टत। कुशलः आहतः अभवत्। तस्य पक्षौ पीडाग्रस्तौ अभवताम्। कुशलः आकाशात् नीचैः अपतत्। तत्र कर्दमस्य गर्तः आसीत्। कुशलः बहिः आगन्तुं न अशक्नोत्। सः उच्चैः चीत्कारम् अकरोत्, 'हे हारीत! हे विरूप! मां त्रायेथाम्।' हारीतः अपि भोजनार्थं भ्रमति स्म। सः कुशलस्य वचनम् अशृणोत्। सः गर्तस्य समीपे आगच्छत् अपि च अवदत्, 'भ्रातः, अहं त्वां पङ्कात् निष्कासयितुं न समर्थः, किन्तु अहं विरूपाय कथयामि, क्षणं यावत् तिष्ठ।'

हारीतः द्रुतवेगेन गत्वा विरूपाय सर्वं वृत्तान्तं न्यवेदयत्। 'विरूपः छोटिकां ददन् आगतः। सः तत्क्षणम् एव कुशलं गर्ताद् बहिः आनयत् अपि च शुद्धजलेन तस्य तस्य स्नानविधिम् अकारयत्। कुशलः अवदत्' 'मित्र, त्वया मे प्राणरक्षा कृता। अतः अहं तव ऋणी। तव उपकारम् अहं न विस्मरिष्यामि। मित्र हारीत! त्वया अहं त्रातः।' हारीतः विरूपः च अवदताम्, 'मित्र, यदि त्वं आवां मित्रे मन्यसे तर्हि ऋणस्वीकारस्य न आवश्यकता। इदं तु मित्रस्य कर्तव्यम् अस्ति।'

एकस्मिन् दिवसे शुकः मधुरस्वरेण आम्रवृक्षस्य शाखायां गीतं गायति स्म। समीपे राजकुमार्याः महालयः आसीत्। राजकुमारी मन्दाकिनी शुकस्य मधुरं गीतं श्रुत्वा प्रसन्ना अभवत्। चत्वारः सेवकाः वृक्षम् आरुह्य शुकं

गृहीत्वा आगता:। राजकुमारी मन्दाकिनी हारीतं सुवर्णस्य पञ्जरे न्यक्षिपत्। हारीत: उदासीन: अभवत्, मन्दाकिनी तस्मिन् फलानि अददात् किन्तु स: भोजनस्य त्यागम् अकरोत्।

रात्रौ हारीत: वृक्षं न आगतवान्। विरूप: च कुशलश्च दु:खितौ अभवताम्। प्रात: काले कुशल: यत्र तत्र सर्वत्र भ्रमणम् अकरोत्। स: प्रतिवृक्षं, प्रतिगृहं गत्वा हारीतस्य अन्वेषणम् अकरोत्। अन्तत: कुशल: हारीतं मन्दाकिन्या: महालये सुवर्णपञ्जरे अपश्यत्। कुशल: अपृच्छत्, 'मित्र, कथं त्वं पञ्जरे निपतित:? किं त्वं महालये निवासं कर्तुम् आगत:?' हारीत: नि:श्वस्य अवदत् 'मित्र! इदं मे मधुरकण्ठस्य पापम्। राजकुमार्या: रक्षकै: अहं बन्दीकृत:। अहं तु पञ्जरे एव मरिष्यामि। मम मुक्ते: उपाय: नास्ति।' कुशल: विहस्य अवदत्, 'भ्रात: हारीत! त्वं विषादं मा कुरु। त्वं न केवलम् एकल:। आवां त्वया सह वर्तावहे। आवां कम् अपि उपायं चिन्तयिष्याव:।' कुशल: वटवृक्षं गत्वा हारीतस्य दुर्दशाम् अवर्णयत्। विरूप: अवदत्, 'मा चिन्तां कुरु, अहम् उपायं करोमि। सुवर्णपञ्जरात् हारीत: मुक्तो भविष्यति।' विरूप: महालयं गत्वा स्वमायां प्रासारयत्। स: अट्टहासं कृत्वा अवदत्, 'हे राजकुमारि! मम मित्रं हारीतं मोचय। अन्यथा सर्वान् अहं पीडयिष्यामि। राजकुमारी मन्दाकिनी विस्मिता अभवत्। सर्वे सेवका:, भयभीता: अभवन्। किन्तु राजकुमारी गर्विष्ठा आसीत्। अत: सा अवदत्, 'हे अदृश्यसत्त्व! अहं न बिभेमि। अहं शुकं न मोचयिष्यामि। त्वं यथा इच्छसि तथा कुरु।' विरूप: अवदत्, ''तर्हि मम शक्तिं पश्य।'' विरूप: अवदत्, 'सर्वे सेवका: उन्मत्ता: भवन्तु।' तत्क्षणम् एव राजकुमार्या: सर्वे सेवका: उन्मत्ता: अभवन्। सर्वे सेवका: मस्तकानि अघूर्णन्त। केचित् भूमौ लुण्ठन्ति स्म, केचित् धूलिं मुष्टौ गृहीत्वा खादन्ति स्म, केचित् स्वमस्तकानि स्तम्भै: सह आस्फालयन्ति स्म। राजकुमारी अन्यान् सेवकान् आहूतवती। किन्तु य: य: राजकुमार्या: महालयम् आगच्छत् स: स: उन्मत्त: अभवत्।

विरूप: पुन: अट्टहासं कृत्वा अवदत्, 'राजकुमारि! त्वं शीघ्रं मम मित्रं मोचय, अन्यथा अहं त्वां वृक्षाग्रं नेष्यामि अपि च वृक्षाग्रात् त्वां क्षेप्स्यामि।' राजा विरूपं ग्रहीतुं सेनापतिम् आज्ञाम् अददात्। किन्तु सेनापति: तु विरूपं न अपश्यत्। स: विरूपं कथं गृह्णीयात्? अन्ते राजकुमारी स्वयम् एव हारीतं पञ्जरात् मुक्तम् अकरोत्। त्रीणि मित्राणि स्ववटवृक्षं प्राप्य सानन्दं गीतम् अगायन्।

हारीत: मधुरस्वरेण, कुशल: कटुस्वरेण, विरूप: भयावहस्वरेण-इत्थं त्रीणि मित्राणि वृक्षं कलकलयुक्तम् अकुर्वन्। किन्तु तेषाम् आनन्द: चिरं यावत् न स्थित:। एकदा श्मशानात् एक: तान्त्रिक: आगत:। स दूराद् एव वृक्षस्य कोटरे विरूपम् अजानात्। तान्त्रिक: विरूपं वशीकर्तुं मनसि निश्चयम् अकरोत्। स: अट्टहासं कृत्वा अवदत्, 'अस्यां रात्रौ अहं वटवृक्षस्य तले निवासं करिष्यामि। श्व: तान्त्रिकविद्यया अहं भूतराजं मम वशीभूतं करिष्यामि।' विरूप: तं दृष्ट्वा भयान्वित: अभवत्। स: मित्रे अवदत्, 'हे हारीत! हे कुशल! अधुना अस्माकं मैत्री समाप्तिं गमिष्यति। श्व: अयं तान्त्रिक: मां ग्रहीष्यति। स: मां तस्य दासं करिष्यति। मम मुक्ते: नास्ति उपाय:।' हारीत: अवदत्, 'मित्र विरूप! त्वं चिन्तां मा कुरु। अहं प्रात:कालात् पूर्वम् उपायं चिन्तयिष्यामि। तदा तान्त्रिक: वृक्षं परित: एकं वर्तुलं मन्त्रै: सह अकरोत्। अत: विरूपस्य कृते पलायनं न शक्यम्। त्रीभि: मित्रै: रात्रिपर्यन्तं जागरणं कृतम्। प्रात:काले हारीत: उच्चै: अहसत्।' स अवदत्, 'विरूप! त्वं चिन्तां मा कुरु। मया उपाय: चिन्तित:।' स: कुशलस्य कर्णे किञ्चिद् अवदत्।

कुशल: अपि प्रसन्न: अभवत्। तदा तान्त्रिकेण यज्ञ: आरब्ध:। स: विचित्रमन्त्रै: विविधद्रव्याणि यज्ञकुण्डे न्यक्षिपत्। तेषां द्रव्याणां सुगन्धेन विहगा: विह्वला: अभवन्। हारीतकुशलौ उड्डीय दूरं गतवन्तौ। किन्तु कुशल: सत्वरं श्मशानम् अगच्छत्। स: चञ्च्वा अस्थिखण्डम् आनीय यज्ञकुण्डे न्यक्षिपत्। अत: तान्त्रिकस्य यज्ञ: निरर्थक: अभवत्। यज्ञस्य देवता कुपिता अभवत्। अत: तान्त्रिक: सवेगं वृक्षं त्यक्त्वा पलायनम् अकरोत्। विरूप: अनृत्यत्।

कुशल: हस्ततलध्वनिम् अकरोत्। हारीत: मधुरं मधुरम् अगायत्। इत्थं त्रीणि मित्राणि सानन्दं परस्परं सहायका: भूत्वा निवसन्ति। त्वं कदापि वटवृक्षं गमिष्यसि तदा त्रयाणां मित्राणां हर्षं स्वयमेव अनुभविष्यसि।

**8, राजतिलकबंगलो,**
**आबादनगर समीपे बोपल, अहमदाबाद**

# हेमचन्द्राचार्यस्य मते योगस्य महत्त्वम्

❑ डॉ. उषाकिरणयादवः

संस्कृतवाङ्मये योगमधिकृत्य विविधाः ग्रन्थाः विरचिताः मनीषिभिस्तेष्वाचार्यहेमचन्द्रस्य योगशास्त्रमेको विशिष्टो ग्रन्थो विद्यते। अस्य ग्रन्थस्य रचनाऽऽचार्येण चौलुक्यवंशजस्य राज्ञः कुमारपालस्य महत्या प्रार्थनया कृता। पद्यवृत्त्युदाहरणात्मकेऽस्मिन् ग्रन्थे योगस्य साङ्गोपाङ्गं निरूपणङ्कृतमाचार्येण। योगस्य सविस्तरं महत्त्वं ग्रन्थस्य प्रथमे प्रकाशे विद्यते। इदं वर्णनम्मयाऽस्मिन् शोधलेखे क्रियतेऽधोलिखितरूपे यथोचितविस्तारोदाहरणाभ्यां बिन्दुशः-

**योगस्य महत्त्वम्**- ग्रन्थानुसारं योगस्य मुख्यमहत्त्वमुभयविधमस्ति-

1. योगः सर्वासां विपल्लतानां कर्तनाय तीक्ष्णः परशुरस्ति। यथा तीक्ष्णपरशुना लतानां समूहः छेत्तुमर्हति तथैव योगेनाध्यात्मिकभौतिकदैविकाः सर्वाः विपदः विनष्टाः जायन्ते।

2. अयं मोक्षलक्ष्मीवशीकरणार्थम्मूलमन्त्रतन्त्ररहितं कार्मणमस्ति। वृत्तौ स्पष्टीकृतं यद्योगेन परमपुरुषार्थरूपायाः मोक्षलक्ष्म्याः प्राप्तिः मूलमन्त्रतन्त्रैर्विनैव जायते। उभयविधस्य महत्त्वं फलमप्युभयविधं प्रोक्तङ्क्रमशः 1. अनर्थपरिहारः 2. अर्थप्राप्तिः।

**''योगः सर्वविपद्वल्लीविताने परशुः शितः।**
**अमूलमन्त्रतन्त्रं च कार्म्मणं निर्वृतिश्रियः।।''**
**सत्वां विपदः..मोक्षलक्ष्मीवशीकरणहेतुरिति-वृत्तिः।**[1]

हेतुक्षयं विना विपन्नाशः कथं भवितुं शक्यते इति शंकां संभाव्य समाधानं कथितमिदं यद् यथा प्रचण्डवायुना सघनपयोदानां घनघटा विनश्यते तथैव दुःखस्य हेतुभूतानां पापानामपि विनाशो भवति।

**''भूयांसोऽपि हि पाप्मानः प्रलयं यान्ति योगतः।**
**चण्डवाताद्घनघना घना घनघटा इव।।''**[2]

अत्रापरा जिज्ञासा भवितुं शक्यते यद् योगेनैकजन्मनः पापं विनाश्यते किं वाऽनेकजन्मनाम्? अस्याः जिज्ञासायाः समाधानङ्कृतमिदं यद् योगेनानेन जन्मसु संचितानि पापानि तथैव नष्टाः भवन्ति यथा चिरकालसंकलितानि काष्ठानि प्रचण्डाग्निना क्षणादेव क्षीयन्ते।

**''क्षिणोति योगः पापानि चिरकालार्जितान्यपि।**
**प्रचितानि यथैधांसि क्षणादेवाशुशुक्षणिः।।''**[3]

2. योगस्य अपरम्महत्त्वं नानालब्धीनां प्राप्तिरूपं प्रतिपादितं तासु द्वयोः कथनमस्मिन् पद्ये कृतम्-

**''कफविप्रुण्मलामर्शसत्वौषधिमहर्द्धयः।**
**सम्भिन्नस्रोतलब्धिश्च योगं ताण्डवडम्बरम्।।''**[4]

पद्यस्य वृत्तौ स्पष्टीकृतं यद् योगस्य प्रभावेण योगिनः सर्वे शारीरिकैन्द्रियविकाराः हस्तादीनां स्पर्शश्च औषधय अर्थान्महत्य ऋद्धयो भवन्ति। आसां क्रमशः वर्णनमग्रांकितमस्ति-

(1) योगस्य महिम्ना योगिनां कफबिन्दवः सर्वरोगनाशकाः जायन्ते। अस्योदाहरणमासीच्चतुर्थचक्रवर्ती सनत्कुमारः यो योगस्य प्रभावेण स्वकफबिन्दुभिः सर्वरोगशमनशक्तिं प्राप्तवान् किन्तु समभावत्वेन तेन अस्याः शक्तेः स्वस्य दैहिकरोगाणां प्रशमने प्रयोगो न कृत अपितु समग्रदुःसहपरिषहानसहन्नानालब्धीश्च प्राप्तवान्। सनत्कुमारेणाऽस्या लब्धेर्प्रामाणिकतार्थन्देवलोकतः परीक्षार्थमागतयोः विजयवैजयन्त्योः समक्षं स्वस्य कफलेपेन स्वकीया दुर्गन्धियुताऽगुंलिः नीरोगा कृता प्रदर्शिता च।[5]

(2) योगिनां पुरीषं कुमुदामोदयुक्तं भवति तेन च रोगनाशोऽपि जायते।

(3) योगिनां सर्वविधशारीरिकमलाः कस्तूरिकासुगन्ध-युताः रोगनाशकाश्च जायन्ते।

(4) तेषाङ्कायस्पर्शेणामृतसंचारो भवति येन तत्क्षणमेव रोगनाशः जायते।

(5) योगिनां देहानां नखकेशदन्तादयो भेषजरूपाणि जायन्ते। इदमेव कारणमस्ति यत्तीर्थंकरदेवानां योगयुतानां चक्रवर्तिनां शरीराण्यस्थ्यादीनि सर्वाण्यङ्गानि देवलोके सर्वत्र स्थाप्यन्ते पूज्यन्ते च।

(6) योगिनां शरीरस्य स्पर्शमात्रेण वर्षायाः नदीनां सरसाञ्च जलमपि सर्वरोगापहारकं संजायते।

(7) तेषामाङ्गिकवातस्पर्शादेव मूर्च्छितजनाः निर्विषाः भवन्ति।

(8) विषमिश्रितमन्नं योगिनः मुखे प्रविश्य विषरहितं जायते।

(9) महाविषव्याधिपीड़िता अपि जनास्तेषां वाचं श्रुत्वा दर्शनेन च विकाररहिताः जायन्ते।[6]

**महर्द्धिषु (क)**- अणुत्वमहत्त्वलघुत्वगुरुत्वप्राप्ति प्राकाम्येशित्वअप्रतिघातित्वान्तर्धानकामरूपित्वाद्यनेको-पलब्धयोऽपि समाविष्टाः सन्ति याश्च योगिभिराप्यन्ते।[7]

(ख) - योगाभ्यासेन विद्याबुद्धिसम्बन्धिता अनेकाः लब्धयः प्राप्यन्ते।[8]

(ग) - योगी योगाभ्यासेन मनोबली वचनबली कायबली च जायते।[9] अत्र कायबलिनः दृष्टान्तः बाहुबलिमुनेः प्रस्तुतीकृतः य एकवर्षपर्यन्तं कायोत्सर्ग-प्रतिमां धारयित्वा स्थित आसीत्।[10]

(घ) - क्षीरलब्धिः मधुलब्धिः घृतलब्धिरमृतलब्धिश्च योगिभिः प्राप्यन्ते।।[11]

(ङ) - चारणविद्याऽशीविषलब्धिरवधिज्ञानमनः पर्यायज्ञानस्य सम्पद अपि योगस्य प्रभावेण लभ्यन्ते।[12]

(च) - योगेन महाप्रज्ञायाः प्राप्तिर्भवति यया संभिन्नस्रोतलब्धिः जायते। अनया लब्ध्या योगी केनाप्येकेनेन्द्रियेणान्येषामपि ज्ञानं प्राप्नोति।[13]

योगजन्यलब्धीनां निरूपणं कृत्वाऽऽचार्येण स्पष्टीकृतं यदेता लब्धयः योगस्वरूपस्य कल्पवृक्षस्य विकसितानां पुष्पाणां शोभाः सन्ति। योगस्य फलं तु केवलज्ञानं मोक्षो वा भवति। फलप्राप्तेः द्वे उदाहरणे प्रस्तुते अत्र भरतः मरुदेवी चेति रूपेण।

**''योगकल्पद्रुमस्यैता विकसितकुसुमश्रियः।''** एता लब्धयो योगकल्पवृक्षस्य कुसुमभूताः। फलं तु केवलज्ञानं मोक्षो वा भरतमरुदेव्युदाहरणाभ्यां वक्ष्यते।

**''अहो योगस्य माहात्म्यं प्राज्यं साम्राज्यमुद्वहन्।**
**अवाप केवलज्ञानं भरतो भरताधिपः।।''**[14]

ग्रन्थे भरताधिपस्य जन्मनः प्रारभ्य केवलज्ञानप्राप्ति-पर्यन्ताऽखिला कथा प्रस्तुतीकृता यया ज्ञायते यच्चक्रवर्तिसाम्राज्यस्याखिलैश्वर्यमुपभुज्यैकामाभूषण-रहितस्य शरीरस्य शोभारहितामवस्थां दृष्ट्वा सम्राजः मनसि शरीरस्य नश्वरतां ज्ञात्वा वैराग्यं संजातमात्मोत्थानस्य प्रवृत्तिश्च जागरिता ततश्च शुक्लध्यानयोगेन केवलज्ञानं समुत्पन्नम्। तत्क्षणमेव देवलोकादागत्य इन्द्रदेवो विनीतो भूत्वा राज्ञे मुनिवेशं समर्पितवान् भरतस्य स्थाने आदित्ययशनामकस्य तत्पुत्रस्य राज्यारोहणं कृतवांश्च।[15]

अत्र शंकां समुत्थाप्य तस्याः समाधानमपि प्रकटी-कृतम्। शंकैषा भवितुं शक्यते यद् योगस्येदं प्रभाववर्णनं तादृशस्य भरताधिपस्य कृते एव युक्तमस्ति येन पूर्वजन्मनि योगस्य समृद्धिरर्जिता तया शक्त्या अशुभकर्मणां क्षयः कृतः कर्मलेशक्षतिमात्राव-

शिष्टाऽऽसीत्। येन जनेन पूर्वजन्मसु योगस्याभ्यासः न कृतः, कर्मणां क्षयो न कृतः, मनुष्यतामात्रमपि नाप्ता तेन कथमनन्तकालसंचितशुभाशुभकर्मणां क्षयो कर्तुं शक्यते। शंकायाः समाधानमनेन पद्येन कृतम्-

**''पूर्वमप्राप्तधर्मापि परमानन्दनन्दिता।**
**योगप्रभावतः प्राप मरुदेवः परं पदम्।।''**

पद्यस्य व्याख्यया ज्ञायते यन्मरुदेवः कस्मिन्नपि जन्मनि न तु त्रसत्वमात्रमपि प्राप्तवान् न च मनुष्यताया अनुभवं कृतवान् तथापि स योगशक्तेः प्रभावेण शुक्लध्यानाग्निना चिरसंकलितानि कर्मस्वरूपाणि काष्ठान्यदहत्।[16] ग्रन्थानुसारं न केवलम्मरुदेवसदृशा एव योगबलेन कर्मणां नाशं कर्तुं शक्नुवन्ति यैः पूर्वजन्मसु क्रूरकर्माणि न कृतान्यपितु ये दुर्जना ब्रह्मस्त्री भ्रूणगोहत्यासदृशघोरपापानि कृत्वा नरकार्हाः भवन्ति तेऽपि नरकप्राप्तेः योग्यानि कर्माणि निर्मूलं कृत्वा परम सम्पदमाप्नुवन्।

**''ब्रह्मस्त्रीभ्रूणगोघातपातकान्नरकातिथेः।**
**दृढप्रहारिप्रभृतेर्योगो हस्तावलम्बनम्।।[17]''**

ग्रन्थे दृढप्रहारिणः समग्रा कथा प्रस्तुतीकृता। तत्रैवापदो दृष्टान्तश्चिलातीपुत्रस्य प्रदत्तः यो योगाश्रयेण तत्कालकृतदुष्कर्मजन्यपापाद्विमुक्तोऽभवद् देवलोकस्य सुखस्याधिकारी चाभवत्।

**''तत्कालकृतदुष्कर्मकर्मठस्य दुरात्मनः।**
**गोप्त्रे चिलातीपुत्रस्य योगाय स्पृहयेन्न कः।।[18]''**

ग्रन्थे चिलातीपुत्रस्य विस्तृता कथा कथिता प्रभावं ज्ञातुम्। आचार्येण सारांशरूपे योगस्य महत्त्वमित्थं प्रकटीकृतम्-

**''स एवायं योगः सकलसुखमूलं विजयते।**
**तस्याजननिरेवास्तु नृपशो मोघजन्मनः।**
**अविद्धकर्णो यो 'योग' इत्यक्षर-शलाकया।।**
**चतुर्वर्गेऽग्रणीर्मोक्षो योगस्तस्य च कारणम्।।[19]''**

निष्कर्षोऽयङ्कथितुं शक्यते यद् योगः समस्त-लौकिकालौकिकसुखानाम्मूलमस्ति। योगशब्दमश्रुत्वा पशु इव मनुष्यजन्म निरर्थकमेवास्ति यतः पुरुषार्थ-चतुष्टयमये मानवजीवने मोक्षः परमपुरुषार्थोऽस्ति तस्य हेतुश्च योगो विद्यते।

सन्दर्भाः-

1. कलिकालसर्वज्ञश्रीहेमचन्द्राचार्यप्रणीतम्-योगशास्त्रम्, 1/5 वृत्तिश्च, श्रीभावनगरस्थश्रीजैनधर्मप्रसारकसभाकार्य-वाहकेन मुद्रापितम् ईस्वीसन् 1926
2. तत्रैव, 1/6 3. तत्रैव, 1/7 4. तत्रैव, 1/8
5. तत्रैव, प्रथमप्रकाशस्याष्टमपद्यस्य स्वोपज्ञा व्याख्या 28-32 पृष्ठेषु। 6. तत्रैव, 32 तमे पृष्ठे वृत्तिः। 7. तत्रैव, 33 तमे पृष्ठे वृत्तिः। 8. तत्रैव, 33 -34 पृष्ठे वृत्तिः।
9. तत्रैव, 34 पृष्ठे वृत्तिः। 10. तत्रैव, 34 पृष्ठे वृत्तिः।
11. तत्रैव, 34 पृष्ठे वृत्तिः।
12. चारणाशीविषावधिमनःपर्यायसम्पदः। तत्रैव, 1/9
13. इन्द्रियाणि संभिन्नानि सङ्गतानि एकैकशः सर्वविषयैस्तेषां लब्धिर्योगस्येदं यौगं ताण्डवडम्बरं दर्शितम्। तत्रैव, 28 पृष्ठे 1/8 पद्यस्य वृत्तिः। 14. तत्रैव, 1/10, 15. तत्रैव, 37-66 पृष्ठेषु वर्णिता 16. तत्रैव, 1/11 वृत्तिश्च 66 पृष्ठेषु
17. तत्रैव, 1/12 वृत्तिश्च कथावर्णनमस्ति-67-71 पृष्ठेषु।
18. तत्रैव, 1/13 वृत्तिश्च 71-76 पृष्ठेषु वर्णिता कथा।
19. तत्रैव, 1/14-15, 76 पृष्ठेषु वृत्तिश्च।

**सह आचार्या, संस्कृतविभागः**
**सेमु मा. राजकीयकन्यास्नातकोत्तरमहाविद्यालयः**
**भीलवाड़ानगरम् (राजस्थानम्)**

# अस्माकं राजस्थानम्

❑ डॉ. नानूराम जाट ( अध्यापक )

भारतवर्षः एकः महान् देशः वर्तते। भारतदेशः प्राचीनकाले आर्यावर्तः इति नाम्ना प्रसिद्धः आसीत्। देशे अनेके प्रदेशाः सन्ति। तेषु साम्प्रतं राजस्थानम् एकं राज्यं वर्तते। राजस्थानं वीराणां वीराङ्गनानां च भूमिः अस्ति। राजस्थानप्रदेशस्य काश्चन एतादृश्यः विशेषताः सन्ति याः खलु अन्यत्र न लभ्यन्ते। अत्र महाराणा प्रतापः, महाराणा सांगा, वीर दुर्गादासः, चन्द्रसेनः, उदयसिंहः, एतादृशाः वीराः समुत्पन्नाः। अत्रैव पद्मिनी, पन्ना, सदृश्यः वीराङ्गना. अपि समुत्पन्नाः।

राजस्थानस्य प्रत्येकस्मिन् भागे दर्शनीयानि स्थलानि सन्ति। अत्र विविधानि ऐतिहासिकस्थलानि अस्मभ्यं गौरवशालीतिहास्य परिचयं कारयन्ति।

राजस्थानस्य राजधानी जयपुरं तु लघुकाशी मन्यते। अयं प्रदेशः न केवलं वीराणां भूमिः अपितु विदुषां जन्मस्थली कार्यस्थली च वर्तते। तेषु महाकविमाघः, भट्टमथुरानाथ-शास्त्री, देवर्षिकलानाथशास्त्री इत्यादयः अत्र अनेके विद्वांसः काले-काले समुत्पन्नाः। राजस्थानप्रदेशे अनेकानि दर्शनीय-स्थलानि सन्ति। प्राकृतिकसौन्दर्यदृष्ट्याऽपि प्रदेशोऽयं सुरम्यः वर्तते। अत्र जैसलमेरनगरे स्थितं सोनारदुर्गं स्वर्णमय-पीतपाषाणैः निर्मितम् अद्भुतं दुर्गम् अस्ति। जनपदे अस्मिन् सीमावर्ति-तनोटमातुः मन्दिरं तु सर्वेषां भारतीयानां मनस्सु देशं प्रति गौरवभावमुत्पादयति। भारतीयैः साकं वैदेशिकाः अपि अत्रागत्य प्रासादान्, थारमरुस्थलं, भादरिया स्थाने स्थितं भारत देशस्य बृहत्तमं पुस्तकालयं रामदेवरास्थानं च प्रतिवर्षं पश्यन्ति। जैसलमेरनगरे रामदेवरास्थाने रामदेवमहाराजस्य प्रसिद्धं मन्दिरं वर्तते। जनाः अत्र आगत्य रामदेवस्य अर्चनां कुर्वन्ति। विश्वविख्यातम् आणविकपरीक्षणनगरं पोकरणस्य समीपस्थं खेतोलाई स्थानमपि जैसलमेरजनपदे दर्शनीयमेव अस्ति।

'सूर्यनगरी' रूपेण प्रसिद्धं जोधपुरनगरमपि ऐतिहासिकं महत्त्वं धारयति। जोधपुरजनपदस्य राजा चन्द्रसेनः स्वाधीनतायाः कृते स्वकीयं सम्पूर्णं जीवनं समर्पितं कृतवान्। मारवाडराज्यस्य राजधानीरूपेण प्रसिद्धेऽस्मिन् जोधपुरनगरे मेहरानगढ दुर्गः, राजस्थानस्य ताजमहलरूपेण जसवन्तथडा नामकं प्रसिद्धं स्थानं, कायलाना-सरोवरः, मण्डौर-उद्यानं च इत्यादीनि प्रसिद्धानि स्थलानि सन्ति। वीरशिरोमणेः प्रतापस्य मातुलगृहं पालीनगरमेवास्ति।

पालीजनपदे परशुराम-महादेवस्य मन्दिरं, स्थापत्य-दृष्ट्या विश्वप्रसिद्धं रणकपुरजैनमन्दिरम् अपि विद्यते। एवमुच्यते यत् अस्मिन् जैनमन्दिरे निर्मितानां स्तम्भानां गणनमपि दुष्करं वर्तते।

मेवाड़क्षेत्रेऽपि प्रसिद्धानि दर्शनीयस्थलानि सन्ति। उदयपुरनगरे दुर्गैः स्तम्भैः कासारैः च नवनिर्मितं प्रताप-गौरवकेन्द्रं विशेषरूपेण द्रष्टव्यमस्ति। उदयपुरनगरे अनेके सरोवराः सन्ति।

अनेन सार्धं आर्बुदपर्वतः, गुलाबीनगरीरूपेण विख्यातं जयपुरं, उत्कृष्टानि विभिन्नमन्दिराणि, घानापक्षीविहारः, रणतभंवर-इत्यादीनि अभयारण्यानि च दर्शनीयानि सन्ति। राजस्थानप्रदेशः पर्यटनदृष्ट्याऽपि प्रसिद्धः अस्ति। अत्र जयपुरं, उदयपुरं, अजेयमेरुः, भरतपुरं, बीकानेरं, इत्यादीनि विभिन्ननगराणि विश्वप्रसिद्धानि सन्ति। अत्र बहवः पर्यटकाः भ्रमणार्थम् आगच्छन्ति।

राजस्थाने जलस्याभावः वर्तते। तस्मात् कारणात् जलसंरक्षणार्थं टांका, कूपः बावड़ी इत्यादीनां निर्माणं कृत्वा जनाः जलसंरक्षणं कुर्वन्ति। अत्र विश्वस्य प्राचीनतमा अरावली-पर्वतमाला राजस्थानस्य द्वयोः भागयोः विभज्यते। अरावली-पर्वतमालायां अनेकाः औषधयः सन्ति। अत्रत्या विशिष्टा लोकसंस्कृतिः, सामाजिकरीतयः, प्रसिद्धानि नृत्यानि च जनान् आकर्षयन्ति। वैदेशिकाः पर्यटकाः अपि गौरवशालिराजस्थानं नमन्ति।

संक्षेपतः सुस्पष्टमस्ति यत् अस्माकं राजस्थानप्रान्तस्य संस्कृतिः पुरातनी विशिष्टतमा च अस्ति। विविधैः विशिष्टगुणैः समन्विता इयं संस्कृतिः समादरणीया वर्तते।

**राजकीय-उच्चप्राथमिकसंस्कृतविद्यालय**
**( माताजी भोपावास, चौमूं, जयपुरम् राजस्थानम् )**

# तत्त्वं पूषन्नपावृणु

❑ स्वामिविवेकानन्दसरस्वती
( कुलाधिपतिः - गुरुकुल-प्रभात-आश्रमः )

(2019 तमस्य दिसम्बरमासस्य 27 दिनांके जवाहरलालनेहरुविश्वविद्यालयस्य संस्कृतप्राच्य-विद्याध्ययनसंस्थान-प्रज्ञाप्रवाहप्रतिष्ठान-उत्तरप्रदेश-संस्कृतसंस्थानयोः संयुक्ततत्त्वावधाने समायोजितस्य ''भारतीयज्ञानपरम्परायाः स्रोतः संस्कृतमित्यभिधस्य प्रथमानुसन्धातृराष्ट्रीयसंस्कृतसम्मेलनस्य उद्घाटनसत्रे गुरुकुलप्रभाताश्रमस्य कुलाधिपतीनां संस्कृताय समर्पितजीवनानां तपोधनानां पूज्यानां स्वामि-विवेकानन्दसरस्वती-महाभागानां जवाहरलालनेहरु-विश्वविद्यालये आध्यक्ष्यं वक्तव्यं संजातम्, तस्योद्बोधनस्य सम्पादितांशः सज्जनानां हिताय अधस्तात् प्रस्तूयते....)

**ओ३म् ममाग्ने वर्चो विहवष्वस्तु वयं त्वेन्धानास्तन्वं पुषेम।
मह्यं नमन्तां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेम।।**[1]

मञ्चासीनाः विद्वद्वरेण्याः श्रोतारश्च! अस्य उद्घाटनसत्रस्य अध्यक्षपदं निर्वोढुं निमन्त्रणाय यदा रामनाथमहोदयः (सम्मेलननिदेशकः) आश्रमं गतः तदा मया अयमुक्तो यदहं किमध्यक्षतां करिष्यामि, कमपि कुलपतिं निमन्त्रयतु भवान्। अनेनाहमुक्तः 'भवान् तु कुलपतेरपि कुलपतिः।' इदमुत्तरं श्रुत्वा अहं तु निरुत्तरः अभवम्। अधुना श्रीमद्भिः विदुषां विचाराः श्रुताः, अहं अस्मिन् विषये विचारयामि यदेतत् सर्वं संस्कृतविषयकं शंकादिकमधुना तु अस्त्येव पूर्वमप्यासीत्, पतंजलि-कालेऽपि आसीत् तदैव तु 'सन्त्यप्रयुक्ताः' अस्मिन् विषये स गणयति- '**सप्तद्वीपा वसुमती त्रयो लोकाश्चत्वारो वेदाः साङ्गाः सरहस्या बहुधा विभिन्नाः एकशत-मध्वर्युशाखाः सहस्रवर्त्मा सामवेदः। एकविंशतिधा बाह्वृच्यम् नवधा आथर्वणो वेदः वाकोवाक्य-मितिहासः, पुराणं वैद्यकमित्येतावाञ्छब्दस्य प्रयोगविषयः। एतावन्तं शब्दस्य प्रयोगविषय-मननुनिशम्य सन्त्यप्रयुक्ताः इति वचनं केवलं साहसमात्रमेव।**[2]' स ऋषिरासीत्, अतः साहसमात्रमेव कथयति। यद्यहम् अभविष्यम् तर्हि दुःसाहसमात्रम् अवदिष्यम्। अनेन ज्ञायते यदीदृशी समस्या पूर्वमप्यासीत्। परं ते ऋषयः स्वसंस्कृतिं प्रति बद्धपरिकराः आसन्। तस्मिन् काले संस्कृतभाषायाः व्यापकं प्रसारं पतञ्जलिरपि '**अजेर्व्यघञपोः**[3]' इति महाभाष्यान्तर्गते सूत्रे एकेन **सूतवैयाकरणसंवादेन** दर्शयति- '**एवं हि कश्चिद् वैयाकरण आह-कोऽस्य रथस्य प्रवेतेति। सूत आह- आयुष्मन्नहं प्राजितेति। वैयाकरण आह-अपशब्द इति। सूत आह-प्राप्तिज्ञो देवानां प्रियो न तु इष्टिज्ञ इष्यत एतद्रूपमिति। वैयाकरण आह-आहो अनेन दुरुतेन बाध्यामहे इति। सूत आह-न खलु वेञः सूतः सुवतेरेव सूतः। यदि सुवतेः कुत्सा प्रयोक्तव्या दुःसूतेनेति वक्तव्यम्।**[4]' अस्मिन् प्रकरणे सामान्यरथ-चालकेन वैयाकरणस्य पराभवं दर्शयित्वा भाष्यकार इंगयति यत् तस्मिन् काले सामान्यजनेष्वपि संस्कृतस्यैव व्यवहारः आसीत्।

संस्कृतस्य व्यापकत्वं महत्त्वं च पूर्ववक्तृभिः प्रतिपादितमेवात्र, ततोऽधिकं प्रतिपादनं तु पिष्टपेषण-मेवास्ति। अतः अधुनास्माभिः दृढसंकल्पेन संस्कृतस्य प्रचारः प्रसारश्च कर्तव्यः। दृढसंकल्पः कथं स्यादिति एकया घटनया बोद्धुं शक्नुमः। राजनैतिकः डॉ. राममनोहरलोहिया शोधच्छात्ररूपेण अनुसन्धानार्थं यदा जर्मनदेशं गतवान्, तदा तत्र वार्तालापेन अजानात् यदयं निर्देशकः जर्मनभाषायामेव निर्देक्ष्यति पाठयिष्यति बोधयिष्यति च। लोहियामहोदयः आर्यभाषायां तु प्रवीणः आसीदेव, आंग्लभाषायामपि प्रवीणः आसीत्, परन्तु जर्मनभाषां न जानाति स्म। तेन तत्रैव संकल्पः कृतः, यदा

जर्मनभाषायां मम अधिकारः भविष्यति तदैव भवतः पार्श्वम् अनुसन्धानस्य निर्देशनार्थम् आगमिष्यामि नो चेन्न आगमिष्यामि। द्वयोः मासयोः परिश्रमेण सः जर्मनभाषायां नैपुण्यं प्राप्तवान्। अनन्तरं सः निर्देशकस्य पार्श्वं गत्वा जर्मनभाषायामेव धाराप्रवाहेण आलपत्। अनेन निर्देशकः अतीव प्रभावितः अनुसन्धानाय निर्देशनं च अकरोत्। अतः अस्माभिरपि दृढसंकल्पेन इत्थमेव संस्कृतप्रचाराय सन्नद्धैर्भाव्यम्। दृढसंकल्पविषये एव वेदेषु उपनिषत्सु अपि आदिष्टमस्ति। यथा अथर्ववेदे-

**उत्तिष्ठ ब्रह्मणस्पते! देवान् यज्ञेन बोधय।**[5]

एवमेव च कठोपनिषदि अपि-

**उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत।**[6]

सामान्येन तु लोके अयं सिद्धान्तःयज्जनः पूर्वं जागर्त्ति अनन्तरमुत्तिष्ठति। किन्त्वत्र उपनिषदि कथं विपरीत-मुच्यते? इमां जिज्ञासां आचार्यशंकरः स्वोपनिषद्भाष्ये समाधत्ते- **उत्तिष्ठत हे जन्तवः! आत्मज्ञानाभिमुखा भवत, जाग्रत अज्ञाननिद्राया घोररूपायाः सर्वानर्थ-बीजभूतायाः क्षयं कुरुत ( शांकरभाष्यम् )।** अस्यायं भावार्थः - यदुत्तिष्ठत अर्थात् सामान्येन उद्बोधनं प्राप्नुत। जाग्रत अर्थात् विशेषेण निद्राक्षयं प्राप्नुत। अनेनैव हेतुना उपनिषदि पूर्वम् उत्तिष्ठत एतदनु 'जाग्रत' शब्दः प्रयुक्तः। आचार्यः शंकरः जागरूक आसीत्, ते ऋषयः जागरूका आसन्, येषां प्रभावेण सर्वत्र संस्कृतस्य प्रसारोऽभवत्।

विद्वांसः संस्कृतवाङ्मयस्य स्थलमात्रमेव निर्दिश्य स्वात्मनः कृतकृत्यान् मन्यन्ते। तत् सर्वं तु पतंजलिना एव महाभाष्ये प्रतिपादितमस्ति, सर्वं किमपि विद्यते संस्कृतवाङ्मये परं तद् व्यवहारे क आनेष्यति? तत्तु अस्माकमेव कर्त्तव्यम्। यदि जर्मनदेशस्य प्राध्यापकः जर्मनभाषायामेव निर्देशनं करोति तर्हि वयं किमर्थं नात्र उद्घाटनसत्रे संस्कृते वक्तुं प्रभवामः? उद्घाटनसत्रेऽस्मिन् उद्घाटनशब्दस्य कोऽर्थः? अनावरणम्। यथा उपनिषदि अपि- **तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।**[7] अत्र द्रष्टारस्तु भवन्तः एव सन्ति। मया तु औपचारिकरूपेण उद्घाटनं कृतम्, मुख्यं अनावरणस्य कार्यं तु भवतामेवास्ति। उत्तिष्ठत, जागरूका भवत अर्थात् प्रमादं त्यक्त्वा उत्तिष्ठत, यतोहि कश्चिद् रोगोऽपि भवति यस्मिन् मनुष्यः शयानः एव उत्थाय चलति, वार्तामपि करोति, परं रोगस्य प्रभावे समाप्ते सति पूर्ववृत्तं सर्वं विस्मरति। कदाचित् स एव रोगस्तु नास्ति अस्माकम्? अत आचार्यः शंकरः कथयति जाग्रत अर्थात् निद्राक्षयं कुरुत। यदा भवन्तः जागरूकाः भविष्यन्ति, यदा भवतां देवसेना अग्रे चलिष्यति, तदैव सर्वे विपक्षिणः पराभूता भविष्यन्ति। वेदोऽपि अत्र विषये साक्षान्निर्दिशति-

**एता देवसेनाःसूर्यकेतवः सचेतसः।**
**अमित्रान्नो जयन्तु।।**[8]

रामनाथझामहोदयः, अन्येऽपि च ये विद्वांसः सन्ति ते तु स्वप्नान् पश्यन्ति, एतदपि समीचीनमस्ति। अस्माकं भूतपूर्वः राष्ट्रपतिः अब्दुलकलामः **'अग्नि की उड़ान'** नामके पुस्तके कथयति यत् पूर्वं स्वप्नम् अवलोकयतु, तदैव सः स्वप्नः साकारः भविष्यति। अहं तु अतीव प्रसीदामि, एकवर्षपूर्वम् अस्मिन् एव विश्वविद्यालये अस्मिन्नेव सभागारे मया उक्तमासीत् पं. नेहरुविश्व-विद्यालस्य संस्कृतविभागः, संस्कृतसंकायः संस्कृतमयो भवेत्। यत्किमपि कार्यं भवेत् संस्कृते भवेत्। नेहरुविश्वविद्यालये **मण्डनमिश्रगेहमिव**[9] संस्कृतस्य तादृशं वातावरणं स्याद् येनात्रत्याः पशुपक्षिणोऽपि संस्कृत एव भाषेरन्। गुरुकुलकांगड़ीविश्वविद्यालये संस्कृत-संकायाध्यक्षः अस्माकमेव गुरुकुलस्य पूर्वच्छात्रः डॉ. सोमदेवः शतांशुः मया पृष्टः भवान् संस्कृताय तत्र किं करोति? तेनोक्तं यन्मया अधुना तु नियमः निर्मितः अस्ति यत्स्वकीय-विभागे संस्कृतेन एव कार्यं करिष्यामि। मया उक्तम् अलं स्वकीये संकाये एव? अरे! सम्पूर्णे गुरुकुलकांगड़ी-विश्वविद्यालये एव संस्कृतं भवेदिति दृढ़संकल्पो भवेत्। प्रज्ञाप्रवाहप्रतिष्ठानस्य अध्यक्ष-महोदय! (जे. नन्दकुमार) भवानपि शृणोतु, भविष्ये

भवतः व्याख्यानमपि संस्कृते एव भवेत्। भवादृशाः सक्षमा एव संस्कृतं न वदिष्यन्ति, तर्हि के वदिष्यन्ति? राममनोहरलोहियामहोदयः इव भवन्तः अपि दृढसंकल्पाः भवन्तु।

पूर्वं कापि घटना मया श्रुता आसीत् तामत्र श्रावयामि- काचिद् वृद्धा गृहाद् बहिः किमपि अन्विष्यति स्म। एकः प्रबुद्धः नवयुवकः, साहाय्यस्य भावनया तां पृष्टवान् अम्ब! किम् अन्विष्यति? तया उक्तं वत्स! मम सूचिका विलुप्ता तामन्विष्यामि। युवकोऽपि तस्य साहाय्ये संलग्नः। यदा बहुविलम्बान्तेऽपि सूचिका न लब्धा तदा युवकः प्रोवाच- 'अम्ब! सूचिका क्व विलुप्ता?' तया उक्तं- 'सूचिका तु प्रकोष्ठे विलुप्ता, परं तत्र अन्धकारः आसीत्, मया विचारितम् अत्र प्रकाशे अवलोकयेयम्।' एवमेव पाश्चात्यानाम् अस्ति, ये मूलमनवलोक्य एव भाष्यादिमाध्यमैः संस्कृतवाङ्मये छिद्रान्वेषणाय संलग्नाः सन्ति। यतस्तेषामुद्देश्यमेव तद्विद्यते। लार्ड मैकाले अपि वैदिकज्ञानविज्ञाने संस्कृतौ सभ्यतायां च छिद्रान्वेषणाय एव ऑक्सफोर्ड विश्वविद्यालये '**बोडन चेयर**' इति नामधेयं पीठमेकं संस्थापयामास। तेषां निरासाय अस्माभिः किं क्रियते? अरे! ये अस्माकम् आकरग्रन्थाः सन्ति तेषाम् अध्ययनं कुर्वन्तु। तत्र यदि कुत्रचित् अन्धकारः अस्ति चेत् अन्धकारम् अपावृण्वन्तु।

अहं तु विचारयामि यदेतद् उद्घाटनं नास्ति, नेत्रोन्मीलनमस्ति। सर्वं शास्त्रम् आर्षदृष्ट्या पठन्तु, पतंजलिना कया दृष्ट्या पठितम्?, गौतमेन कथं पठितम्? तया दृष्ट्या एव सर्वे पठन्तु। पाश्चात्त्यानां दृष्ट्या अपि यदि महर्षिपतञ्जलेः आचार्यशंकराचार्यस्य च कालं पश्याम-स्तर्हि तदापि पाश्चात्त्यभाष्यकारेभ्यस्तु एते प्राचीनाः एव सिद्ध्यन्ति। तेषां महर्षीणां समक्षं अधुना को विद्यते? तेषां महर्षीणां प्रामाणिकतां कः प्रतिपादयिष्यति? स्वकीयां ध्वजां क उत्तोलयिष्यति? अस्माकमेव तु एतद्दायित्वम् अस्ति। अस्माकं देवसेना न्यूयार्कं गच्छेत्, मास्को गच्छेत्, अन्येष्वपि च देशेषु यत्र-यत्र वयं आस्म, तत्र-तत्र एषा देवसेना गच्छेत्, तत्र पुनः वैदिकध्वजां देवभाषा-संस्कृतध्वजां स्थापयेत्। तदा तु एते अस्माकं महत्त्वं स्वीकरिष्यन्ति। अहं तु अधुना इदमेव प्रार्थये यदेषा शक्तिः नेहरुविश्वविद्यालये तु भविष्यत्येव। अस्माकं वाचस्पतिमहोदयः यदा गुरुकुले पठति स्म तदा मया अयमुक्त आसीत् यत् संस्कृतस्य छात्रेभ्यः अधिकाः प्रबुद्धाः उत्सुकास्तु विज्ञानविषयस्य छात्राः भवन्ति तान् संस्कृतविषयं बोधयतु। संस्कृतस्य छात्रस्तु प्रायः 'रामः रामौ रामाः' इत्यादिषु एव संलग्नः भवति। यत्र जलस्य अभावो भवति तत्रैव वृष्टेः सार्थकता, जलाप्लाविते स्थले वृष्टेः का आवश्यकता? अनेन महोदयेन प्रयासः कृतः, बहुषु सम्मान्यपदेषु स्थितः। साम्प्रतं च उत्तरप्रदेश-संस्कृतसंस्थानस्य दायित्त्वमपि श्रद्धया निर्वहन् सर्वदैव संस्कृतप्रचाराय यतते। पूर्वम् उत्तरप्रदेशसंस्कृतसंस्थानं कर्गलेष्वेव आसीत्, अस्य प्रयासैरेव अद्य संस्थानस्य कार्यं सर्वेऽनुभवन्ति। एवं हि सर्वेऽपि जागरूकाः भूत्वा संस्कृतस्योत्थानाय कृतसंकल्पाः भवन्तु। एतदर्थमहं परमात्मानं प्रार्थये यदीश्वरः भवद्भ्यः सामर्थ्यं प्रयच्छत्विति।

**उत्तिष्ठ ब्रह्मणस्पते! देवान् यज्ञेन बोधय।।**
**।। ओ३म् शान्तिः शान्तिः शान्तिः।।**

---

1. ऋग्वेद - 10/128/1 2. महाभाष्यम् पस्पशा ह्निकम्

3. पाणिनीयाष्टाध्यायी-2/4/56 4. महाभाष्यम्-2/4/56

5. उत्तिष्ठ ब्रह्मणस्पते देवान् यज्ञेन बोधय आयुः प्राणं प्रजां पशुं कीर्तिम् यजमानं च वर्धय।। अथर्व., 19/63/1

6. उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत। क्षुरस्य धारा निशिता दुरत्यया दुर्गं पथस्तत् कवयो वदन्ति।। कठ. 1/3/14

7. हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये।।ईश. 15

8. अथर्व - 5/21/12

9. स्वतः प्रमाणं परतः प्रमाणं कीरांगना यत्र गिरं गिरन्ति। द्वारस्थनीडान्तरसन्निरूद्धाः जानीहि तन्मण्डनपण्डितौकः।। माधवीयदिग्विजय-8/6

# वैशेषिकदर्शने सृष्टिप्रलयप्रकारोपस्थापनम्

❑ अजयकुमारकरः

चित्रविचित्रेयं सृष्टिर्वस्तुतः अतीव रहस्यात्मिका, अतो मननशीलोऽयं जिज्ञासुमानवः अस्मिन् विषये जिज्ञासोपजिज्ञासया समाधिनोपसमाधिना स्वीयां जिज्ञासां न कथमपि उपशमयितुमलमेतद्विचार्य ऋषि-महर्षिभिः स्वीयया प्रखरमेधया परमात्मसाहाय्येन सर्वाणि रहस्यानि विज्ञाय, मानवमात्रकल्याणाय उपदिष्टानि तेष्वेव सृष्टिसंरचना प्रलयश्च वर्तते। यद्यपीदं सत्यं यद् महर्षिकणादोक्तवैशेषिकसूत्रेषु तु सृष्टिप्रकारः प्रलयः= संहारप्रकारो वा न क्वचिदपि स्पष्टमुपलभ्यते परमाचार्यप्रशस्तपादेन काणादीयं सूक्ष्ममनोभावं केषाञ्चित् सूत्राणां माध्यमेन अनुनिशम्य पृथिव्यप्ते-जोवायुपदार्थनिरूपणानन्तरमेतेषामेव हि परमाणूनां संघातेन सृष्टिर्विघातेन च प्रलयः, अतः सृष्टिप्रलयविचार उत्थापितः। अनन्तरं तमेव ग्रन्थमनुसरद्भिः भाष्यकारैः श्रीधराचार्योदयनाचार्यव्योमशिवाचार्यादिभिः स्व-स्वटीकायां भाष्ये वा प्रशस्तपादीयमभिमतमेव विवेचितं तदेवेहोपस्थाप्यते पञ्चदशनिमेषाः काष्ठाः त्रिंविंशतिकाष्ठाः कलाः, पञ्चदश-कलाः नाडिकाः, त्रिंशत्कला मुहूर्तः त्रिंशत्मुहूर्तकाहोरात्रः पञ्चदशाहोरात्राः पक्षः। द्वौ पक्षौ मासः, द्वौ मासौऋर्तुः, षट् ऋतवो द्वादशमासाः वा संवत्सरः, ऋतुत्रयेणोत्तरायणम्, ऋतुत्रयेण दक्षिणा-यनमुत्तरायणञ्च देवानां दिनम्, दक्षिणायनं रात्रिः तथा-भूताहोरात्रशत त्रय षष्ट्यधिकेन वर्षम्, द्वादशसहस्रैश्च वर्षैश्चतुर्युगम्। चतुर्युग सहस्रपरिमितं ब्रह्मणो दिनम्। तथा च-

**मानुषेणैकवर्षेण देवानां दिनमुच्यते।**
**तेषां शतत्रयं षष्टियुक्तं वर्षस्तु दैवतः।।**
**देववर्षसहस्राणि द्वादशाहश्चतुर्युगम्।**
**चतुर्युगसहस्रन्तु ब्रह्मणो दिनमुच्यते।।**

इत्यादिस्मृतिवचनानि ब्रह्मणो दिनपरिमाणे प्रमाणमित्यनेन मानेन वर्षशतस्यान्ते वर्तमानस्य ब्रह्मणो मुक्तिकाले संसारे नानास्थानेषु भूयोभूयः शरीरादिपरि-ग्रहेण खिन्नानां गर्भवासादीनां विविधदुःखेन दुःखितानां प्राणिनां कञ्चित्कालं-विश्रामार्थं दुःखोपशमार्थं सकलभुवनपतेः महेश्वरस्य संजिहीर्षा[1] भवति। तदनन्तरं शरीरेन्द्रियमहाभूतारम्भकाणां सर्वेष्वात्मसु समवेतानाम-दृष्टानां शक्तिप्रतिबन्धः स्यात् तस्मिन् सति अनागतानां शरीरेन्द्रियमहाभूतानामुत्पत्तिः। उत्पन्नानाञ्च विनाशार्थं महेश्वरेच्छया आत्मनां परमाणूनाञ्च संयोगेभ्यः परमाणुषु क्रियाः जायन्ते। ततः शरीराणामिन्द्रियाणां च ये परम्परया कारणभूताः परमाणवः तेषु विभागाः भवन्ति। संयोग-निवृत्तौ सत्यां तेषामापरमाण्वन्तो नाशः। एवमेव पृथिव्यप्तेजोवायूनामपि अनेनैव रीत्या महाभूताना-मुत्तरोत्तरविनाशेन पूर्वं विनाशः समुत्पद्यते। तथाहि जलस्यावस्थितेः पृथिव्या विनाश एव तेजसः स्थितेरपि जलस्य विनाशः वायोरवस्थिते तेजसो विनाशः ततश्च प्रतिभक्ताः परमाणवः अवतिष्ठन्ते। एतेषां धर्माधर्म-भावनाख्यसंस्कारश्चानुविद्धात्मनश्च ब्रह्मणो वर्षशतं यावदवतिष्ठन्ते अयं संहारक्रमः।

ततः पुनः आत्मनां सुखदुःखानुभवोत्पत्तये महेश्वरस्य सिसृक्षा जायते, ततः सर्वेष्वात्मसु विद्यमानानि अदृष्टानि वृत्तिं लभन्ते, तदपेक्षेभ्यः आत्मपरमाणुसंयोगेभ्यः पवनपरमाणुषु कर्माण्युत्पद्यन्ते। पवनपरमाणवस्तत्र समवायिकारणम्। लब्धवृत्त्यदृष्टवदात्मपरमाणु-संयोगेऽसमवायिकारणदृष्टं निमित्तकारणमेवं कर्मोत्पत्तौ तेषां पवनपरमाणूनां परस्परसंयोगेभ्यश्च द्व्यणुकानि

जायन्ते। तदनु त्र्यणुकानीत्यनेन क्रमेण महान् वायुः समुत्पद्यमान आकाशे दोधूयमानो वेगातिशययुक्त-स्तिष्ठति। तदनन्तरं तस्मिन्नेव वायौ अद्भ्यः परमाणुभ्यः द्व्यणुकादिक्रमेण महान् सलिल-निधिरुत्पन्नः सर्वत्र पोप्लूयमानस्तिष्ठति। ततस्तस्मिन्नेव जलधौ पार्थिवेभ्यः परमाणुभ्यो महापृथिवी समुत्पन्ना स्थिरस्वभावावतिष्ठते। तदनन्तरं तस्मिन्नेव महोदधौ तेजोभ्य अणुभ्यो द्व्यणुकादिक्रमेणोत्पन्नो महांस्तेजोराशिः देदीप्यमान-स्तिष्ठति।[2] यद्यपि पयःपावकयोः स्वाभाविको विरोधस्तथाप्यदृष्टवशेनाधाराधेयभावः।[3]

एवमुत्पन्नेषु महाभूतेषु महेश्वरस्य संकल्पमात्रात् महदण्डमारभते। तस्मिन्नण्डे चतुर्वदनकमलं सर्वलोक-पितामहं सकलभुवनसहितमुत्पाद्य प्रजासर्गे विनियुङ्क्ते। स च महेश्वरेण विनियुक्तो ब्रह्मा अतिशयित-ज्ञानवैराग्यैश्वर्यसम्पन्नः प्राणिनां कर्मविपाकं विदित्वा कर्मानुगुणज्ञानभोगायुषः सुतान् दक्षादीन् प्रजापतीन् मानसान् मनस्सङ्कल्पप्रभवान् मनून् देवानृषीन् पितृगणान् मुखबाहूसम्पादितश्चतुरो वर्णान् अन्यानि चोच्चावचानि क्षुद्रक्षुद्रतराणि च भूतानि सृष्ट्वा कर्मानुरूपैः धर्मज्ञान-वैराग्यैश्वर्यं योजयति इत्ययं सृष्टिक्रमः।

अत्र युक्तिरेषा परमाणुसद्भावे ततो जगत्सृष्टौ चोक्ता किरणावल्यामणुपरिमाणतारतम्यं क्वचिद्विश्रान्तं परिमाणतारतम्यत्वात्।[4] महत्त्वपरिमाणतारतम्यवत्। यत्रेदं विश्रान्तं ततः परमाणुर्नास्ति सः परमाणुः, स चैको जनकः। एकस्य नित्यस्य चारम्भकत्वे कार्यस्य सन्ततोत्पत्तिः स्यात्, अपेक्षणीयाभावाद् अविनाशित्वात् प्रसज्यते। आश्रयविनाशावयवविभागस्य विनाशहेतोर-भावात्। त्रयाणां परमाणूनामारम्भकत्वञ्च न सम्भवति। अतो महत्कार्यद्रव्यस्योत्पत्तौ स्वपरिमाणापेक्षया अल्पपरिमाणस्य कार्यद्रव्यस्यैव सामर्थ्यदर्शनात्। त्र्यणुकं कार्यद्रव्येणैव जायते महत्परिमाणत्वाद् घटवत्। इत्थञ्च त्रयाणामेकस्य चारम्भकत्वे प्रतिक्षिप्ते द्वाभ्यामेव परमाणुभ्यामारभ्यते यत् तद् द्व्यणुकमुच्यते। द्वाभ्यां द्व्यणुकाभ्यां त्र्यणुकोत्पत्तौ त्र्यणुकस्य महत्त्वं न स्यात्। अवयवबहुत्वस्यापेक्षिततत्वाद् अतस्त्रिभिर्द्व्यणुकै-स्त्र्यणुकमिति। न चैवं सति द्व्यणुकानामेव घटारम्भक-त्वापत्तिः घटस्य भङ्गेऽल्पतरभावदर्शनेन तथैवारम्भक-त्वात्। अतः त्र्यणुकादिक्रमेण घटाद्युत्पत्तिः। अत्रेदं चिन्तनीयं त्रिभिः परमाणुभिरेव त्र्यणुकमस्तु, परमाणु-भ्यामनारम्भस्तु सिद्धान्तीनां द्व्यणुकाभ्यामनारम्भ इव मानाभावात्। फलबलेन त्रयाणामेव युगपद्द्रव्यारम्भक-संयोगसंकल्पनात्।

न्यायवैशेषिकदर्शनसंमतेऽस्मिन् ईश्वराधिष्ठितेभ्यः परमाणुभ्यो जगत्सृष्टिरितिपक्षे वेदान्तिभिरुद्भासितान् दोषानिदानीं पर्यालोच्यते। ब्रह्ममीमांसायां तर्कपादाख्ये द्वितीयपादे-

1. महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम्।
2. उभयथापि न कर्मतस्तदभावः।
3. समवायाभ्युपगमाच्च साम्यादनवस्थितेः।
4. नित्यमेव च भावात्।
5. रूपादिमत्त्वाच्च विपर्ययो दर्शनात्।
6. उभयथा च दोषात्,
7. अपरिग्रहाच्चात्यन्तमनपेक्षा।।[5]

इति सप्तभिः सूत्रैः वैशेषिकमतं दूषितम्। तत्र शाङ्करभाष्ये महद्दीर्घवद्वेति प्रथमसूत्रम् अणुवादिना ब्रह्मवादिनि उत्प्रेक्ष्यमाणस्य दोषस्य प्रतिसमाधानपरतया व्याख्यातम्। 'उभयथापि न कर्मतस्तदभावः' इति द्वितीयं सूत्रं परमाणुकारणवादनिरासपरतया व्याख्यातम्। तथाहि प्रलयकाले विभागावस्थायां तावत् परमाणूनां संयोगः कर्मापेक्षोऽभ्युपगतां कर्मवतां तत्त्वादीनां संयोग-दर्शनात् कर्मणश्च निमित्तं तस्यामवस्थायां प्रयत्नाभिघाता-

देरसम्भवात् अदृष्टमेवेत्यभ्युपगतम् 'अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनमणूनां मनश्चाद्यं कर्मादृष्टकारितम्।[6]' इति तत्र जिज्ञासा किमात्मसमवेतमदृष्टं परमाणुषु कर्म विकल्पते। अदृष्टस्याचेतनत्वात् न ह्यचेतनं चेतनानधिष्ठितं स्वतन्त्रं प्रवर्तते। आत्मनश्च तस्यावस्थायामचेतनत्वाभ्युपगमात्। किं चात्मसमवेतमदृष्टमणुषु कथं कर्मोत्पादयेत्। अतः कार्यकारणयोः समानाधिकरणस्यावश्यकत्वात्। आत्मसमवेतमदृष्टं स्वाश्रयसंयोगसम्बन्धेनाणुषु सम्बन्ध्यमानं कर्मोत्पादयतीति चेन्न संयोगस्य सातत्यात् प्रवृत्तिसातत्यप्रसङ्गादिति।

किञ्च परमाणूनां परस्परं संयोगो न घटते। एकस्य परमाणोरन्येन परमाणुना सह किं कार्त्स्न्येन संयोगः किं वा एकदेशेन, नाद्यः उपचयानुपपत्तेरणुमात्रत्वप्रसङ्गात्, दृष्टिविपर्ययाच्च। प्रदेशवतो द्रव्यस्य प्रदेशवता द्रव्यान्तरेण संयोगस्य दृष्टत्वात्, द्वितीयः परमाणूनां सावयवत्वप्रसङ्गः, ततश्च निमित्ताभावात् संयोगोत्पत्त्यर्थं कर्म नाणूनां सम्भवति एवं महाप्रलयेऽपि विभागोत्पत्त्यर्थं न प्रलयप्रसिद्ध्यर्थम् इत्यतो निमित्ताभावान्न अणूनां विभागार्थं कर्मेति।

अत्र समाधानमेवं प्रकारेण अदृष्टवशादेव परमाणुष्वाद्यं कर्म। अदृष्टं तु यद्यपि चैतन्यशून्यैर्जीवात्मभिः प्रलयकालेनाधिष्ठीयन्ते। तथापि ईश्वरेणाधिष्ठीयन्त इत्यभ्युपगमान्नानुपपत्तिः, अदृष्टाधिष्ठातृतया ईश्वरसाधकयुक्तिषु अन्यतमतया न्यायवार्तिककुसुमाञ्जल्यादावुक्तत्वात् यदत्र भामत्यामुक्तम्- निमित्तकारणतामात्रेण त्वीश्वरस्य अधिष्ठातृत्वमुपरिष्टान्निराकरिष्यते इति, तत्रोच्यते 'पत्युरसामञ्जस्यात्।' इत्यधिकरणोक्तानि दूषणानि न्यायवार्तिके समाहितानि पूर्वमस्माभिरनूदितानि चेति न पुनः प्रतनुते। संयोगविषये यद्दूषणमुक्तम्, तस्यापि विपक्वादृष्टावच्छिन्नात्म- संयोगस्य सततमविद्यमानत्वात् न सृष्टिसातत्यादिप्रसङ्गः इति परिहारः।

**'समवायाभ्युपगमाच्च साम्यादनवस्थितेः[7]'**

इति सूत्रे द्वाभ्यां चाणुभ्यां द्व्यणुकमुत्पद्यमानमणुभ्यामत्यन्तभिन्नमण्वोः सम्भवतीति भवताऽङ्गीक्रियते। तथैव ह्युणुभ्यामत्यन्तभिन्नं सत् द्व्यणुकं समवायसम्बन्धेन ताभ्यां संबध्यते एवं समवायोऽपि समवायिभ्योऽत्यन्तभिन्नः सन् अन्येनैव समवायेन समवायिभिः संबध्यते। अत्यन्तभेदसाम्यात्। तथा च तस्मादन्योऽन्यः सम्पद्यते। अत्यन्तभेदसाम्यात्। तथा च तस्मादन्योऽन्यः सम्बन्धः कल्पयितव्य इत्यनवस्था प्रसज्यते। तस्मादनुपपन्नपरमाणुकारणवाद इति भगवत्पादैरुक्तम्। समवायमधिकृत्य पृथगेव वक्तव्यमिति।

'नित्यमेव च भावात्'[8] इति सूत्रे अणवः किं प्रवृत्तिस्वभावा वा निवृत्तिस्वभावा वा उभयस्वभावा वा। प्रवृत्तिस्वभावत्वे नित्यमेव प्रवृत्तेः भावात् प्रलयाभावप्रसङ्गः। निवृत्तिस्वभावत्वे नित्यमेव निवृत्तेर्भावात् सर्गाभावप्रसङ्गः। उभयस्वभाववत्वं च विरोधादसमञ्जसम्। अनुभूयस्वभावत्वे तु निमित्तवशात् प्रवृत्तिनिवृऽयोरङ्गीकार्यतया तन्निमित्तमदृष्टमेवेति अदृष्टस्य नित्यसंनिधानान्नित्य- प्रवृत्तिप्रसङ्गः। अदृष्टस्यानिमित्तत्वे नित्यप्रवृत्तिप्रसङ्गः। तस्मादप्यनुपपन्नः परमाणुकारणवाद इति भगवत्पादैर्भाषितम्। अत्र प्रशस्तपादाचार्यैरेवं[9] समाहितम्-

परमेश्वरेच्छावशात् प्रलयकालेऽदृष्टं प्रतिबद्धशक्तिं सृष्टिकाले लब्धवृत्तिकं भवतीति स्वीकारान्न सर्वदा प्रवृत्तेर्न वा सर्वदा निवृत्तेः प्रसङ्ग इति अथवा ब्रह्मकारणवादेऽप्येवं विकल्पे ब्रह्म स्वेच्छया कालविशेषः प्रवर्तते निवर्तते च परमाणव तुल्यमुत्तरमिति।

**'रूपादिमत्त्वाच्च विपर्ययो दर्शनात्'[10]**

इति रूपादिमतां घटादीनां स्वकारणापेक्षया स्थूलत्वस्य अनित्यत्वस्य च दर्शनात् रूपादिमतां परमाणूनामपि स्वकारणापेक्षया स्थूलत्वस्य अनित्यत्वस्य च प्रसङ्गो भाषितमिति।

अत्रैव समाधानम्- अनवस्थाभयात् अवयव-परम्परायाः परमाणौ विश्रान्तत्वे सति रूपादिमत्त्वं न स्थूलताया अनित्यत्वस्य च प्रयोजकम्। अपि तु अवयवबहुत्वादेः स्थूलतायां प्रयोजकत्वम्। अवयवनाश अवयवसंयोगविनाशयोश्च अनित्यत्वे प्रयोजकत्वमिति स्वीकारान्न दोष इति। रामानुजभाष्योक्तदूषणान्या-लोचयन् इदं समाधानप्रकरणम् अदृष्टकारितेन कर्मणा संयुज्य, मानाभ्यां निरवयवाभ्यां परमाणुभ्यां द्व्यणु-काद्युत्पत्तिक्रमेण जगदुत्पत्तिकल्पनेयं न युज्यते।

परमाणूनां निरवयवत्वे संयोगासम्भवाद् यथाङ्गु-लिद्वयं दशदिक् सम्बन्धदिशा प्रदेशावच्छिन्नं परस्परं संयुज्यमानमेकया महादिशा संयुज्यत इत्येवं प्रत्येकं त्रिभिस्त्रिभिः प्रदेशैः संयुज्यत इत्येवं षड्भिः पार्श्वैः संयुज्यमानाः प्रत्येकमसंयुक्ताः, सप्तपार्श्वयुक्ताः सन्तः स्वाधिकपरिमाणं पटमारभन्त इति दृष्टम्। एवं परमाणवोऽपि षड्भिः पार्श्वैः संयुज्यमाना एव पारिमाण्डल्याख्यस्वपरिमाणाधिकपरिमाणम्। अणु-त्वह्रस्वत्वयुक्तद्व्यणुकमहत्त्वदीर्घत्वयुक्तत्र्यणुकादिकार्य - मारभन्तेति वक्तव्य्। परमाणूनां प्रदेशभेदोऽवश्यमङ्गी-करणीयः। तथा त्र्यणुकोत्पादकद्व्यणुकत्रयसंयोगनिर्वा-हार्थमपि सोऽभ्युपेयः। स हि हस्तपुस्तक- संयोगाद् इव द्व्यणुकावयवं परमाणुद्व्यणुकान्तरसंयोगात् द्व्यणुकार-म्भकपरमाणौतदारम्भकपरमाण्वन्तरसंयागे स्थिते प्रदेशभेदं विना कथं त्र्यणुकोत्पत्तिसमये द्व्यणुकान्तर-संयोगः स्यात् मूर्तानां समानदेशताविरोधात्। यदि तु मूर्तत्वेऽपि परमाणुषु समानदेशता नेष्यते। तदा षण्णां परमाणूनां पिण्डरूपं त्र्यणुकं परमाणुपरिमाणानां स्यात्, तदाहुः-

**षट्केण द्व्यणुसंयोगात् परमाणोः षडंशता।**
**षण्णां समानदेशत्वे पिण्डं स्यादणुमात्रकः।।**[11]

इति प्रागादिचतुर्दिगूर्ध्वोऽधोदेशवर्तिभिः षड्भिः परमाणुभिः सम्बध्यमानो मध्यस्थः परमाणुः षडंशः प्राप्नोति। भिन्नदेशवशात् सम्बन्धानाम्। अथ समानदेशाः सर्वे सम्बन्धाः तदा सर्वेषामेषां पिण्डः परमाणुमात्रः आप्नोतीति तदर्थः। समानमिदं दूषणं द्व्यणुकेभ्यस्त्र्यणु-कोत्पत्तावपि। तस्माद् द्व्यणुकत्र्यणुकादिजननतत्परि-माणातिशययोः सिद्ध्यर्थं परमाणुषु षडंशत्वमनिच्छतापि अङ्गीकार्यम्। अथ संशयत्वेऽनवस्थेति बिभेषि तर्हि परमाणुकारणवादं परित्यज्य ब्रह्मकारणवादं परिग्रहण-मिति मुख्यं दूषणं रामानुजीयग्रन्थेषु प्रत्यपादि। अत्र समाधानम्-सावयवाः पदार्थाः यथा संयुज्यन्ते तदा षट्पार्श्वावश्यकता निरवयवास्तु प्रदेशभेदं विना अपि संयोगं प्राप्नुवन्ति। अन्यथा निरवयवत्वे ब्रह्मणि कथमितरद्रव्यसंयोगा भवन्तीति चेदेकः परिहारः उक्तो हि न्यायसिद्धाञ्जने-

'एवमारम्भकाणामणूनां कृत्स्नैकदेशसंयोग-विकल्पेन अधिकपरिमाणद्रव्यानारम्भकत्वसभागत्वादि चोद्यं कृतम्। तदेतन्माध्यमिकानामेवोपपद्यते न त्वन्येषां कथं तर्हि भाष्यम्? दृश्यमानातिरिक्तं कल्पनानिरभि-प्रायम्।[12]' इति। अपि च सिद्धान्ते परमाणुस्थानीयं त्र्यणुकं निरवयवम्। महत्त्वशून्यमपि तदुद्भूतवत्वादेव प्रत्यक्ष-मिति स्वीक्रियते।

**शोधच्छात्रः**
**सर्वदर्शनविभागः, राष्ट्रियसंस्कृतसंस्थानम्**
**नई दिल्ली-110058**

---

1.यद्यपि भगवत इच्छास्तीत्येवमाकारा एकैव तथाप्युपाधिभेदात् सञ्जिहीर्षा चिकीर्षेत्युच्यते। किरणावली, द्वितीयभागः पृ. 314
2. प्र. भा. पृ. 46 3. किरणावली, द्वितीयभागः, पृ. 318
4. किरणावली, द्वितीयभागः, पृ. 316
5. ब्र. सू. 2/2/12-17 6. ब्र. सू. 5/2/13
7. ब्र. सू. 2/2/13 8. ब्र. सू. 2/2/14
9. प्र. भा. पृ. 121-131 10. ब्र. सू. 2/2/15
11. किरणावली, द्वितीयभागः, पृ. 319
12. न्या. सिद्धाञ्जनम्, सर्ग. प्रकरणम्

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

# ईश्वरदर्शनम्

सुप्रथितः खलु दर्शन-मनीषी, ''अद्वैतसिद्धि'' प्रभृतिग्रन्थलेखकः षोडशशताब्दीकालिको मधुसूदन-सरस्वती। तस्य ह्यनेके ग्रन्था वेदान्तदर्शनविषयकाः प्रकाशिताः सन्ति। तस्यैको ग्रन्थः ''प्रस्थानभेदः'' इति नाम्ना सपद्येव प्रकाशितः प्रमोदाय भवेद् विदुषाम्। विभिन्नेषु दर्शनप्रस्थानेषु अद्वितीयः परमेश्वर एव प्रतिपाद्योऽस्ति इति सिद्धान्तं प्रतिपादयत्यस्मिन् ग्रन्थे संक्षेपेण वेदाङ्गानां, दर्शनभेदानां न्याय-मीमांसा-वेदान्तादीनां च विवरणं प्रदाय विविधेषु प्रस्थानेषु किं प्रतिपादितमिति विषयः स्पष्टीकृतः। प्रौढगद्यबद्धस्यास्य लघुग्रन्थस्य पाण्डुलिपिर्जयपुरीये स्वामिलक्ष्मीरामग्रन्थसंग्रहालये समुपलब्धाऽऽसीत्। तस्या महत्त्वं विज्ञाय तस्याः प्रकाशनं जयपुरस्थेन विश्वगुरुदीप-आश्रमशोधसंस्थानेन कृतमस्ति। संस्थानस्यास्य संयोजकेन महामण्डलेश्वर-स्वामी ज्ञानेश्वरपुरीवर्येणाऽस्याः सम्पादनं कृतमस्ति।

एकस्यैव प्रतिपाद्यस्य स्थापनाय कथं प्रस्थानभेदेन वेद-वेदाङ्ग-दर्शनादिषु विभिन्नानां मतानां सम्प्रदायानां च स्थापना भवति, कश्च तेषामाशय इत्यस्मिन् ग्रन्थे विवेच्य मधुसूदनसरस्वतीवर्येण शास्त्राणां सारो निहित इति पाठकाः प्राप्स्यन्ति। जगद्गुरुरामानन्दाचार्यराजस्थान-संस्कृतविश्वविद्यालयेन सम्बद्धं, अचिरादेव विभिन्न-शास्त्रीयविषयशोधविवरणादिषु विभिन्नगतिविधीनां संचालनं कुर्वाणं विश्वगुरुदीप-आश्रमशोधसंस्थानं सद्य एव एवंविधानां ग्रन्थानां प्रकाशनमप्यारभते इति सुतरां स्वागतार्हम्।

**'प्रस्थानभेदः' ले. मधुसूदनसरस्वती, सम्पादकः महामण्डलेश्वरस्वामी ज्ञानेश्वरपुरी, प्रकाशकः विश्वगुरुदीप आश्रमशोध संस्थान, कीर्तिनगर, श्यामनगर सोढाला, जयपुर पृ.सं. 24 मू. 50/-.**

## व्याकरणकाव्यम्

वैयाकरणचूडामणेर्नागेशभट्टस्य व्याकरणग्रन्थेषु परिभाषेन्दुशेखरः प्रसिद्धोऽस्ति। अत्र व्याकरण-परिभाषाणां शास्त्रीयं विवेचनं कृतमस्ति। नव्य-व्याकरणस्यायं ग्रन्थः पाठ्यचर्यासु सम्मिलितोऽस्ति। एतस्याध्ययनं व्याकरणछात्रैः क्रियते। एतस्मिन् सूचितानां परिभाषाणां प्रेरणामादाय राजस्थानीयेनैकेन पं. लक्ष्मीनारायणशर्मणा नायकस्य नायिकायाः दूत्याश्च परिकल्पनां कृत्वा तेषां परस्परालापे कथं परिभाषाणा-मासां सन्दर्भः सूचयितुं शक्यते इति योजनां विधाय 38 पद्येषु परिभाषेन्दुप्रिया नामकं प्रकाशनं जयपुरस्थेन विश्वगुरुदीप आश्रम शोधसंस्थानेन कृतमस्ति।

पद्यानामवबोधाय संस्कृते महामण्डलेश्वर स्वामी ज्ञानेश्वरपुरीवर्येण ज्ञानेश्वरी नाम्नी टीका विलिखितास्ति या प्रतिपद्यं पुस्तकेऽस्मिन् मुद्रिताऽस्ति। तदनन्तरं कारिकाया अर्थो हिन्द्यां संक्षिप्तानुवादरूपेण सूचितोऽस्ति। ग्रन्थस्य नाम ''परिभाषेन्दुप्रिया'' इति मुद्रितोऽस्ति।

**परिभाषेन्दुप्रिया ले. पं. लक्ष्मीनारायण शर्मा संपादक महामण्डलेश्वर स्वामी ज्ञानेश्वरपुरी प्रकाशक विश्वगुरुदीपआश्रमशोधसंस्थान कीर्तिनगर श्याम-नगर सोढाला, जयपुर पृ.सं. 28 मू. 50/-.**

### जैनागमग्रन्थः

सुप्रतिष्ठितः श्रमणसंस्कृतिपुरोधा आचार्य महाप्रज्ञः सुविदित एव संस्कृतविदुषाम्। तेन संस्कृतेऽपि लेखनं विहितम्, काव्यरचनाऽपि कृता। आचार्य तुलसीवर्य-स्यानुयायिनोऽस्य महाप्रज्ञाचार्यस्य नूतन एको ग्रन्थः सपद्येव प्रकाशमायातो यः खलु श्रमणसंस्कृति-सिद्धान्तानां शास्त्रीयं पक्षं सरलतया सविस्तरं समुपदिशति । यथा श्रीमद्भगवद्गीता कृष्णार्जुनसंवाद-रूपेण विविधशास्त्राणामुपदेशं सरलतया सारगर्भितरीत्या च प्रस्तौति तथैव ''सम्बोधि'' शीर्षके अनुष्टुप् पद्यबद्धे ग्रन्थे आचार्य महाप्रज्ञेन महावीर-मेघकुमारसंवादरूपेण विविधसिद्धान्तानामुपदेशः प्रस्तुतोऽस्ति।

भगवतो महावीरस्य समये मगधसम्राजः श्रेणिकस्य राजकुमारो मेघकुमारः स्वकीयं गृहस्थजीवनं साधु यापयन् महावीरस्य वाणीं श्रुत्वा सहसैव वैराग्यमनुभूय प्रव्रज्यामङ्गीकरोति। तेन सह भगवतो महावीरस्य यः संवादः समजनि तस्मिन् ये प्रश्नाः, उत्तराणि, सिद्धान्ताश्च समाविष्टाः तेषां गीतावत् पूर्णोऽभिलेखोऽस्ति ''सम्बोधि'' नामा। कथं ज्ञानमुद्भवति, किं रूपं च ज्ञानं भवतीत्यादि विषया अत्र द्रष्टुं शक्यन्ते। षोडश (16) अध्यायेषु 786 अनुष्टुप् पद्येषु च सोऽयं संवादो निबद्धोऽस्ति महाप्रज्ञाचार्येण। सुखदुःखमीमांसा, आत्मकर्तृत्ववादः, मोक्षसाधनमीमांसा, बंधमोक्षवादः, संयतचर्या, साध्यसाधनसंज्ञानम्, गृहिधर्मचर्या, मनः प्रसादः एवंविधा अध्याया इमे वर्ण्यविषयं स्पष्टमेव सूचयन्ति।

ग्रन्थे प्रतिपद्यं , प्रतिपद्यद्वयं वा सहैव हिन्द्यामनुवादः पद्यानां मुद्रितोऽस्तीति सामान्यपाठकानां कृते महत् सौविध्यकरं सिध्येत्। संस्कृते गुरुशिष्यसंवाद-शैल्यामेवंविधो ग्रन्थः श्रमणसाहित्ये नूतनया शैल्या सरलतया च विधया ज्ञानसामग्रीं प्रस्तौतीति सुतरां प्रमोदावहम्। एतस्य प्रकाशनस्योपलक्ष्ये राजस्थाने लाडनूपनगरस्था जैनविश्वभारती वर्धापनमर्हति।

**सम्बोधिः ले. आचार्य महाप्रज्ञः प्रकाशक जैन विश्वभारती पोस्ट लाडनू, जिला-नागौर, राजस्थान पृ. सं. 240 मूल्यम् 140/-.**

---

# पाठकपरामर्श

❑ डॉ. रघुवीरप्रसादशर्मा
**प्राध्यापकः**

भारतीपत्रिकायाः पाठकसम्मेलने भागग्रहणस्य सौभाग्यं प्राप्तम्। पाठकान् एकस्मिन् मञ्चे आहूय विचाराभिव्यक्तेः योऽवसरो भवद्भिः कल्पितः सः श्लाघनीयः एव। संस्कृतस्य प्राचीनतमां पत्रिकां प्रति पाठकानां या भावना तत्र दृष्टा सा मनसि आनन्दमुत्साहञ्च अजनयत्। संस्कृतस्य संरक्षणाय संवर्धनाय च यथा इयं पत्रिका प्रवृत्ता वर्तते तथैव अस्माभिः पाठकैरपि स्वस्तरे प्रयासः करणीयः। यदि वयं पञ्च जनान् पत्रिकायाः ग्राहकान् कुर्मश्चेत् संस्कृतसंरक्षणसंकल्पात्मिका इयं पत्रिका झटित्येव व्यापकं प्रसारं प्राप्नुयात्। तेन संस्कृतसम्पोषकैः लेखैः अपेक्षितस्य परिणामस्य सम्प्राप्तिः स्यात्।

अस्यां पत्रिकायां बहुविधलेखा प्रकाशिताः भवन्ति, समसामयिकविषया अपि चर्चिता भवन्ति तथापि संस्कृतजगति जायमानं परिवर्तनं तथैव समयानुकारि करणीयं कार्यमाणं चर्चाबिन्दु भवेदिति अपेक्षा वर्तते।

# अस्माकं गुरवः

( गताङ्कादग्रे )

❑ वेणीमाधव गो. धर्माधिकारी

**गोवामुक्तिः -**

1955 ई. वर्षे गोमान्तके क्षेत्रे पुर्त्तगालशासनविरोधे आन्दोलने संघस्वयंसेवकैरपि पुर्त्तगालविरुद्धमान्दोलने साहाय्यं कृतम्। तदा प्रकाशिते एकस्मिन् परिपत्रे गुरुभिः कथितमासीत्-गोमान्तके भारतीयारक्षिभिः प्रविश्य कार्यं कर्त्तुमयं स्वर्णावसरः। एतेन गोमान्तकमुक्तिस्तु भविष्यत्येव राष्ट्रस्य प्रतिष्ठावृद्धिरपि भविष्यति।

**एको नूतनो मार्गः-**

ब्रह्मदेशादागताः विश्वबौद्धानुयायिनां संस्थाध्यक्षाः न्यायमूर्त्तयः "ऊथाण्टटुव" महोदयाः गुरुमहाभागैर्मिलिताः। तैः कथितं महात्मना बुद्धेनापि सनातनहिन्दुधर्मस्यैव प्रचारः कृतः। महात्मा बुद्धोऽप्यत्रैवोत्पन्नः। अतो बौद्धा अपि सनातनधर्मान्तर्गतः पन्थविशेषः एव। भारतीया अपि बुद्धं नवमावतारं स्वीकुर्वन्ति।

**डॉ. अम्बेडकरमहोदयानां विधायिका दृष्टिः -**

1956 ई. वर्षे विजयादशम्याः शुभेऽवसरे बाबामहोदयानां डा. अम्बेडकरमहाभागानां नेत्तृत्वे लक्षावधिभिरनुसूचितजातीयैः महारबन्धुभिः बौद्धमतं स्वीकृतम्। अस्मिन् विषये गुरुमहाभागानां प्रतिक्रिया ध्येया वर्तते। अज्ञाने दुःखे च पतितं हिन्दुसमाजस्याभिन्नमङ्गमेकं बृहद् भागमवमानितावस्थातः उपरि समुत्थाप्य तं सम्मानितावस्थायामानयनस्यासामान्यं प्रयत्नं तैर्विहितमिति अस्मद् राष्ट्रस्य तैर्महदुपकृतम्।

अस्मिन् प्रसङ्गे स्मरणीया एका विशिष्टा परिस्थितिः। बाल्ये एव बाबाअम्बेडकरमहोदयैः हिन्दुधर्मस्य पुनीताः संस्काराः आत्मसात्कृता आसन्। अत एव दीर्घकालं यावत् तैः प्रयासः कृतो यद् हिन्दुसमाजस्योच्चवर्णीया बान्धवाः अस्पृश्यबान्धवेभ्यः समानतायाः सम्मानस्य चाधिकारं दद्युः परं दौर्भाग्येनाऽस्मिन् विफलत्वात्ते हिन्दुधर्मात्पृथग्गन्तुं विचारमकुर्वन्। तदा इशुधर्मावलम्बिभिः, मुस्लिमधर्मावलम्बिभिश्च स्वधर्मे आगन्तुमाकर्षकाः प्रस्तावाः प्रस्तुतास्तदा तैश्चिन्तितमिशुधर्मावलम्बनमांग्लशासकेभ्यो बलप्रदानं भविष्यति। मुस्लिमधर्मेतु व्यक्तिस्वातन्त्र्यं नास्त्ये।

अन्ते च तैर्गान्धिमहोदयेभ्यः पत्रं लिखितं यदहं करिष्ये न तद् भारतीयसंस्कृतेः परम्पराणां च नाशकं भविष्यति। भवन्तः आश्वस्ताः भवेयुः।

**इन्दौरशिविरे मार्गदर्शनम्ः-**

संगठनकार्यदृष्ट्या संघस्य प्रमुखकार्यकर्त्तृणां समये समये आवश्यकं मार्गदर्शनं कर्त्तुं 1954 ई. वर्षे सिन्दी अधिवेशनानन्तरं 1960 ई. वर्षे इन्दौरनगरे कार्यकर्त्तृणां द्वितीयं शिविरमायोजितम्। अस्मिन् शिविरे संघस्य विभागकार्यकर्तृभिः सहैव संघस्य विभिन्नक्षेत्रेषु कार्यरताः स्वयंसेवकाः अपि सम्मिलिता बभूवुः। तत्र श्रीमद्गुरूणां प्रतिदिनं विचारमण्डनं प्रमुखबन्धुभिः स्पष्टो निर्बाधः संवादश्च भवतिस्म। तस्मिन् संघस्य नित्यकार्यं नैमित्तिककार्यं चेति कार्यस्य द्विविधं स्वरूपं स्पष्टं कुर्वद्भिः गुरुभिः कथितम्- कस्यामपि परिस्थितौ स्वस्य दैनन्दिनशाखाकार्यक्रमे शैथिल्यं न भवेत्।

समाजे वर्णव्यवस्थाविषये तैः स्पष्टीकृतम्- यद् यथा कस्यापि वृक्षस्य वर्द्धनसमये तस्य शुष्काः शाखाः निपतन्ति तत्स्थाने नूतनाः शाखाः उद्भवन्ति तथैवाऽस्माकं समाजे कस्मिंश्चित्समये विद्यमानां वर्णव्यवस्थां परावर्त्त्य

स्वकृते नवीनां रचनां समाज एव स्वयं करिष्यति। इदं हि समाजे विकासप्रक्रियायाः स्वाभाविकमङ्गम् भूयश्च श्रीमद्भिः गुरुभिः संघस्य अनुशासनकल्पनायाः संघकार्यस्याध्यात्मिकं स्वरूपमपि बोधितम्।

**राजनीत्या सम्बन्धो नास्ति-**

श्रीमद्गुरवः राष्ट्रजीवनस्य विभिन्नक्षेत्राणि हिन्दुत्व-प्रभावितानि कर्त्तुं कतिपयप्रचारकान् तत्तत्क्षेत्रेषु प्रैषयन्। डा. श्यामाप्रसादमुखर्जीमहोदयाः बंगप्रदेशे पूर्वतः स्थापितं जनसंघम् अखिलभारतीयं स्वरूपं प्रदातुं कार्यकर्त्तॄन्प्रदातुं गुरुभ्यो न्यवेदयन्। गुरवस्तेभ्यः सहकार्यार्थं पं दीनदयालोपाध्यायान्, अटलबिहारि-वाजपेयीन्, नानाजीदेशमुखप्रभृतीन् प्रचारकान् प्रददुः। श्रीमद्भिः गुरुभिस्तेभ्यः स्पष्टीकृतं यद् राष्ट्रीयस्वयं-सेवकसंघं राजनीतौ घर्षणं नोचितम्। यतः स कस्यापि दलविशेषस्याधीनो भूत्वा कार्यं कर्त्तुं न क्षमः। तस्य मुख्यं कार्यं राष्ट्रस्य वास्तविकसांस्कृतिकं जीवनं पल्लवित-करणमस्ति। डा. मुखर्जीमहोदयैः सहर्षमिदं स्वीकृतम्। इदमपि च कथितं यत्ते हिन्दुराष्ट्रस्यादर्शेन पूर्णरूपेण सहमताः। एवमेव श्रीगुरवः श्रमिकक्षेत्रे दत्तोपन्त-ठेगडीमहोदयान्, अखिलभारतीयविद्यार्थिपरिषदि-शिक्षाक्षेत्रे कार्यकर्त्तॄन् प्रचारकान् प्रददुः सम्बद्धक्षेत्रानुरूपं मार्गदर्शनमकुर्वन्।

**हिन्दुसमाजार्थं बहुमूल्यं योगदानम्-**

श्रीमद्भिर्गुरुभिर्विशिष्टावधानेन स्वयमेव यत्कार्यं प्रमुखरूपेण प्रारब्धं तदस्ति ''विश्वहिन्दुपरिषत्''। धर्मभावजागरणस्यानिवार्यावश्यकतायाः पूर्त्यर्थमस्य-मंचस्य स्थापनां कर्तुं तेषां विचार आसीत्। अस्य शुभारम्भो मुम्बईनगरस्य स्वामिनश्चिन्मयानन्दस्य सन्दीपन्याश्रमे समभवत्। अस्मिन्नधिवेशने सिक्खपन्थ-स्य नायको मा. तारासिंहः, बौद्धानां दलाईलामा, जैनाचार्याः, आर्यसमाजनायकाः, कन्हैयालाल-माणिक्यलालमुंशीमहोदयाः, अन्यान्ये च सन्तः सम्मिलिता बभूवुः। 1966 ई. वर्षस्य कुम्भमेलके तीर्थराजप्रयागे पावनसमये वैश्विकहिन्दुसम्मलने अस्य कार्यस्य विधिपूर्वकं स्थापना संजाता।

क्रमशः-

**ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्** **चतुरशीतितमः प्रसङ्गः**

# मिथ्यानिमन्त्रणचातुर्यम्

**❑ सौ. आराधना धर्माधिकारी**

कुमारमहोदयानां पदोन्नतिरभवत्। तैः नगरस्य श्रेष्ठतमे भोजनालये स्वकार्यालयस्य वरिष्ठाधिकारिणः सहकर्मिणश्च भोजनार्थमाहूताः। परं भृत्याय रामसहायाय निमन्त्रणं स्वप्रतिष्ठाविरुद्धं मतम्। अपरेद्युः रामसहायेन कुमारमहोदयानामभिवादनं कृत्वा व्यंग्येन कथितं महोदय! ह्यः मम विस्मरणं कथं जातम्। तैः महता चातुर्येण त्वरितमेव कथितं स्वचलदूरभाष-यन्त्रमुत्थाप्य पश्य कतिवारं मया आह्वानं कृतम्। तेन यन्त्रमुत्थाप्यावलोकितम् आह्वानानि त्वासन् परं घण्टिका तु न श्रुता/महता चातुर्येण तैराह्वानं कृतं येन स न शृणुयात् त्वरितमेव च विच्छेदः कृतः। अस्यार्थस्तु स जानातिस्म परं निरुत्तर आसीत्।

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाष: 01482-286106/07
दिल्ली कार्यालय: ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोन: 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालय: शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्स:- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

(हिन्दी) साप्ताहिक **पाञ्चजन्य**

(English) Weekly **ORGANISER**

हमारी विशेषताएं



- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई-पेपर की सुविधा



You can subscribe Panchjanya/Organiser Weeklies online through our Websites: www.panchjanya.com, www.organiser.org

वार्षिक ग्राहक शुल्क

भारत में ₹ 700/- पाञ्चजन्य • ₹ 800/- ORGANISER (साधारण डाक द्वारा)

विदेशों में $ 80 (विदेशों में हवाई डाक द्वारा)

**प्रसार विभाग**
**भारत प्रकाशन (दिल्ली) लिमिटेड**
2322, संस्कृति भवन, लक्ष्मी नारायण गली, पहाड़गंज, नई दिल्ली- 110055
फोन : 011-47642000,01,02, ई-मेल: circ@bpdl.in

नारी-स्तम्भः

# गुणैरभिज्ञाता 'रुमा'

❑ डॉ. राजेश्वरी भट्टः

आत्मनिर्भरता, आर्थिकस्वतन्त्रता वा अद्य नारीणां मनसि कीलायिता दृढेच्छा दृश्यते। भवतु अशिक्षिता शिक्षिता, कुमारी, विवाहिता, सम्पन्ना, कृच्छ्रार्था, नगरनिवासिनी ग्रामेभवा वा स्वावलम्बनं सर्वासां संकल्पो वर्तते। अस्मिन् प्रसंगे शून्यात् शिखरं प्रति अग्रेसरा, राजस्थानप्रदेशस्य हस्तशिल्प-कौशलं विश्वस्तरे प्रापयित्री, 2019 तमे वर्षे 'विश्वमहिलादिवसे' महिलाक्षेत्रे सर्वोच्चेन स्पृहणीयेन च नारीशक्तिसम्मानेन राष्ट्रपतिमहोदयेन सम्मानिता, 'रूमादेवी' उल्लेखनीया वर्तते। वस्त्रेषु कृतेन हस्तशिल्पकौशलमाध्यमेन, विश्वे विश्रुता 'रूमादेवी' बाड़मेरखण्डे 'मंगला की बेडी' नाम्नि ग्रामे 1990 वर्षे कृषिजीविपरिवारे जनिमलभत। जन्मनः पञ्चवर्षाण्यनन्तरमेव कन्यका रूमा मातृच्छायया विहीना जाता। अस्तव्यस्तः पिता अचिरमेव द्वितीयां सहचरीमवृणोत्। सहैव अबोधां बालिकां पितृव्यस्य संरक्षणे समर्प्य आश्वस्तोऽभवत्। पितृव्यस्य परिवारे वर्धमाना रूमा अभावानामनुबन्धनेन नैकानि कष्टान्यसहत। समयः स आसीत् यदा जलमानेतुं किशोरी रूमा पञ्चक्रोशपर्यन्तं मार्गं शकटिकया पारंकृत्वा दूरतरमगच्छत्। ततः सप्तदशवर्षे वयसि रूमा विवाहबन्धनेन बद्धा जाता। श्वशुरालयेऽपि अर्थ-संकोचेन खिन्ना रूमादेवी गृहस्य आर्थिकतन्त्रं सुसञ्चालयितुं कटिबद्धा जाता। एतत्कृते पूर्वं तु 2000 तमे वर्षे रूमादेवी ग्रामस्य दशमहिलानां सहयोगेन 'स्वयं सहायता समूह' इति संस्थायाः स्थापनां कृतवती। समूहस्यास्य सामूहिकप्रयत्नेन रूमादेवी भिन्न-भिन्न-वर्णानां सूत्रैः वस्त्रेषु विभिन्नानां पुष्प-पशुपक्षिणां चित्राणि निर्मितवती। पूर्वं तु अस्मिन् कार्ये अनेका बाधा उत्थिता जाता, किन्तु 'समूहस्य' नारीणां सहयोगेन कार्यमिदं पुनः गतिं प्राप्नोत्। आत्मनः कार्ये सन्तुष्टिमधिगम्य समत्वभावेन प्रेरिता उदारमना कर्मयोगिनी रूमादेवी अन्यासां महिलानां आर्थिकसंरक्षणाय प्रयत्नवती जाता। अस्मिन् प्रयासे रूमादेवी प्रतिगृहं गत्वा नारी-जागरणं कृतवती। पूर्वं तु प्रायः सर्वत्र निराशा एव हस्तगता किन्तु शनैः शनैः रूमादेव्याः कार्येण संतुष्टा ग्रामवासिन्यो माया अभियाने अग्रे आगताः। अचिरमेव महिलासमूहस्य शिल्पनैपुण्येनाभिभूतेन बाडमेरस्थितेन ''ग्रामीणविकासचेतना'' इति संस्थानेन 2008 तमे वर्षे रूमादेवी संस्थानेनानेन सम्मानिता जाता, ततो द्विवर्षानन्तरं संस्थानस्यास्य अध्यक्षपदमलंकृतवती। रूमादेव्याः संस्थापितेन नारीसमूहमाध्यमेन प्रत्येकं नारी प्रतिमासं 3000 रुप्यकेभ्य आरभ्य 10000 रुप्यकाणि अर्जितुं सक्षमा वर्तते। रूमादेव्याः संस्थानेन निर्मितानि मनोहराणि वस्त्राणि देशेभ्यो विदेशेभ्यश्च आगतानां पर्यटकानां मनांस्यावर्जयन्ति। किमधिकं, लंदन, कोलम्बो, जर्मनी, सिंगापुरादिषु देशेषु आयोजितासु हस्तशिल्पप्रदर्शनीषु रूमादेव्या निर्देशने निर्मितानि विभिन्न वस्त्रोत्पादनानि प्रशंसनीयानि जातानि। नारीसशक्तीकरणस्य दिशायां प्रवृत्तेऽस्मिन्नभियाने रूमादेव्याः प्रयासेन अद्य 75 पञ्चसप्ततिग्रामाणां 22000 द्वाविंशसहस्रम् महिला हस्तशिल्पमाध्यमेन आत्मनिर्भराः सहैव अन्यासां नारीणां पथप्रदर्शिकाः सन्ति। असामान्यशिल्पनैपुण्येन 'रूमादेवी' यत्र तत्र सर्वत्र सम्मानिता वर्तते। सम्प्रति ''इंडिया मर्चेण्ट चैम्बरस्य'' महिलाविभागेन रूमादेवी बहुश्रुतेन जानकी देवी पुरस्कारेण सम्मानिता भविष्यति। कानिचिद् दिनानि पूर्वं ''कौन बनेगा करोड़पति'' इति दूरदर्शन कार्य-क्रमे त्रयोदश (13) लक्षरुप्यकाणि जित्वा शताब्द्या नायकेन अमिताभबच्चनमहोदयेन सम्मानिता जाता। हस्तशिल्पमाध्यमेन राजस्थानस्य कीर्तिं कलयन्ती रूमादेवी नूनं प्रेरिका वर्तते।

# हिन्दी अनुवाद

आत्मनिर्भरता अथवा आर्थिक स्वतन्त्रता आज प्राय: सभी नारियों के मन में स्थित प्रबल इच्छा है। भले ही शिक्षिता अशिक्षिता, सम्पन्ना, विपन्ना अविवाहिता विवाहिता, नगर निवासिनी अथवा ग्राम्या सभी के मन में स्वावलम्बन की भावना जड़ जमाये हुए है। इस क्रम में शून्य से शिखर की ओर सतत गतिशीला राजस्थान की हस्तशिल्प कला को विश्वस्तर पर प्रसिद्धि दिलाने वाली 2019 ई में विश्वमहिला दिवस पर राष्ट्रपति महोदय के द्वारा महिला क्षेत्र में सर्वोच्च एवं दुर्लभ 'नारी शक्तिसम्मान' से सम्मानित, राष्ट्र को गौरवान्वित करने वाली बाड़मेर जिले की 'रूमादेवी' विशषरूप से उल्लेखनीया है। हस्तकला शिल्प के माध्यम से विश्व में विश्रुत रूमादेवी को जन्म राजस्थान के बाड़मेर जिले में 1990 में मंगल की बेडी नाम छोटे से ग्राम में हुआ। पाँच वर्ष की आयु में ही इनकी माता का निधन हो गया, तथा पिता ने अपने जीवन की गाड़ी चलाने के लिए दूसरा विवाह कर लिया साथ ही पाँच वर्ष की कन्या को उसके चाचा के संरक्षण में सौंप दिया। चाचा के परिवार में अभावों के बीच जीवन निर्वाह करने वाली रूमा को अनेक कष्टों का सामना करना पड़ा। उस समय जल के अभाव के कारण रूमा को दस मील तक बैलगाड़ी में जाकर जल लाना पड़ता था। कुछ वर्षो पश्चात् सत्रह वर्ष की आयु में रूमा का विवाह हो गया साथ ही आठवीं कक्षा में ही रूमा की पढ़ाई में विराम हो गया। ससुराल में भी धन की कमी से खिन्न रूमा ने गृहस्थी के आर्थिक तन्त्र के सुसञ्चालन के लिए संकल्प लिया। अपने संकल्प की सिद्धि के लिए रूमा ने सबसे पहिले 2000 ई. में गाँव की दस महिलाओं के सहयोग से 'स्वयं सहायता समूह' नामक संस्था की स्थापना की इस समूह के सामूहिक प्रयत्न से रूमादेवी ने विभिन्न रंगों के धागों से आकर्षक आकृति उकेरकर आकर्षक वस्त्रों का निर्माण किया। पूर्व में इस कार्य में अनेक बाधाएँ आई, किन्तु नारियों के सहयोग से एवं धैर्य से रूमादेवी के कार्य में पुन: गतिशीलता आई अपने कार्य में आशातीत सफलता प्राप्त कर 'आत्मवत् सर्वभूतेषु' अर्थात् सब प्राणियों को अपनी तरह समझो इस समत्व की भावना से भरी हुई कर्मयोगिनी रूमादेवी अन्य महिलाओं के आर्थिक सशक्तीकरण के लिए कटिबद्ध हो गई। इस दिशा में प्रयत्नशील 'रूमादेवी' ने गाँवों में घर-घर जाकर महिलाओं को जागरित किया। पूर्व में तो प्राय: सभी परिवारों में विरोध का सामना करना पड़ा किन्तु धीरे धीरे रूमादेवी के प्रयत्न से परितुष्ट 'ग्रामवासी' रूमा के संकल्प की सिद्धि के लिए आगे आने लगे। साथ ही 'महिला समूह' के शिल्प ने पुण्य से अभिभूत बाड़मेर जिले में स्थित 'ग्रामीण विकास एवं चेतना संस्थान' के द्वारा 2008 ई में रूमादेवी को संस्थान के सदस्य के रूप में सम्मानित किया गया तथा दो वर्ष पश्चात् ही संस्था के अध्यक्ष पद पर अलंकृत किया गया। 'रूमादेवी' के द्वरा स्थापित 'नारीसमूह' संस्था के माध्यम से कार्य करने वाली प्रत्येक नारी 3000 रुपयों से लेकर 10000 रुपयों तक अर्जित करने में सक्षम है। रूमादेवी के संस्थान में निर्मित आकर्षक वस्त्र देश विदेश से आए हुए पर्यटकों का मन लुभाता है। यहाँ तक कि लंदन, कोलम्बो, जर्मनी, सिंगापुर आदि देशों में आयोजित हस्तशिल्प प्रदर्शिनीयों में 'रूमादेवी' के निर्देशन में निर्मित वस्त्र प्रशसनीय रहे हैं। निरन्तर नारी सशक्तीकरण के उद्देश्य से संचालित इस अभियान में 'रूमादेवी' के प्रयास से आये 75 गाँवों की 22000 महिलायें हस्तशिल्प कौशल के माध्यम से स्वयं आत्मनिर्भर होकर अन्य महिलाओं की पथ प्रदर्शिका हैं। अपने असामान्य शिल्प नै पुण्य के कारण हाल ही में 'इण्डिया मर्चेन्ट चैम्बर' के महिला विभाग के द्वारा रूमादेवी के लिए 'जानकी देवी पुरस्कार' की घोषणा की गई है। कुछ दिन पूर्व, कौन बनेगा करोड़पति दूरदर्शन द्वारा प्रसारित इस कार्यक्रम में शताब्दी के महानायक अभिताभ बच्चन के हाथों से 13 लाख रुपये जीतकर राष्ट्र में अपनी पहचान बनाई। राजस्थान के हस्तशिल्प कौशल को अन्तरराष्ट्रिय स्तर तक विख्यात करने वाली छोटे से गाँव की महिला आज राष्ट्र की प्रेरणा है।

-सी-276, भाभा मार्ग, तिलकनगर, जयपुर

आयुर्वेद-स्तम्भः

# शिशिरेऽपि कफश्चितिः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**मकरे प्रविष्टः भगवान् भास्करः, उत्तरायणस्य च प्रारंभः सञ्जातः, यदा यदा हि मिहिरस्य मकरराशौ प्रवेशस्तदा तदा ह्युत्तरेणायनेन गमनं भवत्यहस्कर-स्यास्य, विशेषेण त्ववाप्तबलो मार्तण्डः शनैः शनैः प्रखरो भवति। वसन्ते मानवशरीरे दिनकृद्भाभिरीरि-तस्य कफस्य स्रवणम्भवति भूरिशः। कालस्तु संवत्सरात्मको भवति। तं संवत्सरं तु षडङ्गमृतु-विभागेन विद्यात्। तत्रादित्यस्योदगयनमादानम्, तत्र हि शिशिरवसन्तग्रीष्मसञ्ज्ञकास्त्रयः ऋतवो भवन्ति। वर्षाशरद्धेमन्तात्मकाश्च पुनस्त्रयः दक्षिणायनं विसर्गश्च एवं षड् ऋतवोऽयने च द्वे भवतः। तत्र उदग् उत्तरां दिशं प्रति, अयनं गमनमुदगयनम् तथा आददाति क्षपयति पृथिव्याः सौम्यांशं प्राणिनां च बलमित्यादानम्, दक्षिणां दिशं प्रति अयनं दक्षिणायनम्, विसृजति जनयति आप्यमंशं प्राणिनां च बलमिति विसर्गः। आदानविसर्गात्मकं शिशिरादिकञ्च सञ्ज्ञाप्रणयनं व्यवहारार्थम्।**

भगवान् सूर्य मकर राशि में प्रविष्ट हो गए हैं और उत्तरायण का प्रारंभ हो गया है, निश्चित रूप से जब जब सूर्य का मकर राशि में प्रवेश होता है तब तब उत्तर मार्ग से सूर्य का गमन होता है। विशेष रूप से तो प्राप्त कर लिया है बल जिसमें ऐसा सूर्य शनैः शनैः प्रखर हो जाता है। वसंत ऋतु में मानव-शरीर में सूर्य की किरणों से प्रेरित हुए कफ का स्रवण बहुत अधिक मात्रा में होता है। काल तो संवत्सरात्मक होता है। उस 6 अंगों वाले संवत्सर को तो ऋतु के विभाग से जानना चाहिए। इसमें सूर्य का उत्तर दिशा की ओर मार्ग आदान है इसमें शिशिर वसंत और ग्रीष्म संज्ञा वाली 3 ऋतुयें होती हैं तथा वर्षा, शरद् और हेमंत ऋतु के रूप में तीन ऋतुयें दक्षिणायन और विसर्गकाल होता है, इस तरह से छः ऋतु हैंऔर दो अयन होते हैं। इसमें उदग् अर्थात् उत्तर दिशा की ओर अयन अर्थात् गमन उदगयन कहलाता है और वह लेता है अर्थात् क्षपण करता है (नष्ट करता है) पृथ्वी के सौम्य अंश को और प्राणियों के बल को इसलिए आदान है। दक्षिण दिशा की ओर गमन दक्षिणायन है, वह उत्पन्न करता है आप्य अंश को (जलीय अंश को) और प्राणियों के बल को इसलिए वह विसर्ग है। आदान और विसर्ग तथा शिशिर इत्यादि संज्ञाओं का जो कथन है वह केवल व्यवहार के लिए है।

**धर्ममधिकृत्योदगयनस्य तु परमं महत्त्वं प्रतिपादितमध्यात्मविद्भिः धर्मशास्त्रकारैश्च। मन्त्रौ-षधिमणि-मङ्गलकर्मणाङ्कृते तथा होमनियमप्राय-श्चित्तोपवासस्वस्त्ययनप्रणिपातगमनाद्यर्थञ्चोपयुक्तो हि कालोऽयम्। व्यावहारिकरूपेणापि समुचितो ह्येषः काल उपर्युक्तानां कार्याणाङ्कृते, यतो हि विसर्गादाप्तबलशरीरो जनः सर्वेषामेतादृग्विधानां कर्मणां करणे समर्थो भवति, किन्तूत्तरायणस्यार्ध-कालपर्यन्तमेवैतत्सामर्थ्यम्, पश्चात्तूत्तरोत्तरं हीय-मानबलं शरीरमेतेषां कर्मणां सम्पादने सामर्थ्यं न प्रकटयति।**

धर्म को अधिकृत कर के तो उत्तरायण का अत्यधिक महत्त्व अध्यात्म को जानने वालों एवं धर्मशास्त्रकारों के द्वारा प्रतिपादित किया गया है। मंत्र,औषधि, मणि और मंगल कर्मों के लिए (कार्यों के लिए) तथा होम, नियम, प्रायश्चित्त, उपवास, स्वस्त्ययन (कल्याणकारी उपाय),

नमस्कार करना, दूरस्थ देवताओं इत्यादि के जाना इसके लिए तो यह काल उपयुक्त ही है। व्यावहारिक रूप से भी यह काल उपर्युक्त कार्यों के लिए उपयुक्त है। क्योंकि विसर्ग के कारण प्राप्त कर लिया है बल जिसमें ऐसे शरीर वाला मनुष्य इस तरह के सभी कर्मों को करने में समर्थ होता है, लेकिन यह सामर्थ्य तो उत्तरायण के आधे काल तक ही होती है बाद में तो उत्तरोत्तर कम होते हुए बलवाला शरीर इन कर्मों को करने में सामर्थ्य प्रकट नहीं करता है।

**यतो हि वसन्तानन्तरं सम्प्राप्ते तु ग्रीष्मे संक्रुद्ध इव भगवान् भास्करः स्वाभिर्भाभिः जगतः स्नेहं पेपीयते, तेन ह्यादानदुर्बलशरीरः श्रान्तः संशुष्कहृदयगलतालुः दीनस्वरः क्लान्तश्च सः शीतमेव सुषूयते। अत एव स्वास्थ्यमभिलक्ष्यादानन्तु नातिश्रेयस्करम्। किन्तु तत्रापि बलस्य क्षपणं सहसा न भवत्यपितु शनैः शनैर्भवत्यत एव शिशिरे वसन्ते त्वाप्तबलाः जनाः सर्वकर्मणां करणे समर्थाः भवन्ति। किन्त्वत्र कालप्रभावजन्याः विकाराः व्यवधानङ्कुर्वन्त्यत एवादानस्य प्रारम्भे शिशिर एव बलसंरक्षणस्य दोषापहरणस्य च प्रक्रिया करणीया।**

क्योंकि वसंत के बाद में ग्रीष्म के प्राप्त होने पर क्रोधित होते हुए की तरह भगवान् भास्कर अपनी किरणों के द्वारा संसार का स्नेह अत्यधिक पीते हैं (पेपीयते अत्यंत पीते हैं) उससे आदान के कारण दुर्बल शरीर वाला, थका हुआ, शुष्क हृदय और तालु वाला, दीन स्वर वाला, क्लान्त (मन से थका हुआ) वह शीत की ही इच्छा करता है। इसलिए स्वास्थ्य को ध्यान में रखकर देखा जाए तो आदान बहुत अधिक श्रेष्ठ नहीं है, लेकिन इसमें भी बल का सहसा नाश नहीं होता अपितु धीरे-धीरे होता है। शिशिर में और वसंत में तो प्राप्त बल वाले लोग सभी कर्मों को करने में समर्थ होते हैं, लेकिन इसमें भी काल के प्रभाव से उत्पन्न होने वाले विकार व्यवधान करते ही हैं, इसलिए आदान के प्रारंभ में शिशिर में ही बल के संरक्षण की एवं दोषों को दूर करने की प्रक्रिया करनी चाहिए।

**क्रमेऽस्मिन् सर्वप्रथमं श्लेष्मणः क्षपणमेव करणीयम्। यतो हि हेमन्ते शिशिरे च श्लेष्मणः सञ्चयो भवति शरीरे, हेमन्ते शिशिरे तु जनाः मात्रां द्रव्यञ्चापेक्ष्य गुरूनेवाभिगृह्णन्त्याहारादीन्, विशेषेण तु गोरसानिक्षुविकृतीर्वसां तैलं नवौदनम् च हेमन्ते शिशिरे चाभ्यसतः श्लेष्मणः सञ्चयो भवति, काले हि शीते शीतानिलस्पर्शसंरुद्धो बलिनां बली पक्ता हेमन्ते मात्राद्रव्यगुरुक्षमो भवति, किन्त्वाहार-पाकपरिणामप्रभावात् बलकराणां रसरक्तादिधातू-नामुत्पत्तिसममेव दोषात्मकस्य श्लेष्मणोऽप्युत्पत्तिः सञ्चयश्च भवति। अत एव तन्निरासार्थं श्लेष्मक्षय-कराणामौषधात्मकानां द्रव्याणाञ्च सेवनं शिशिरे वसन्ते च करणीयम्। आचार्यः सुश्रुतः निर्दिशति यत्-**

**सञ्चयेऽपहृता दोषा लभन्ते नोत्तरा गतीः।**
**ते तूत्तरासु गतिषु भवन्ति बलवत्तराः।।**

(सुश्रुत.सूत्र. 21/37)

**अत्र व्याख्याकारः स्पष्टयति यत्- तेषामपहरणं च बहुदोषे शोधनं, मध्यदोषे लङ्घनपाचनम्, अल्पदोषे संशमनमिति।। (डल्हणः)**

इस क्रम में सर्वप्रथम श्लेष्मा का नाश ही करना चाहिए क्योंकि हेमंत में और शिशिर में श्लेष्मा का संचय शरीर में होता है। हेमंत में और शिशिर में तो लोग मात्रा और द्रव्य की अपेक्षा करके गरिष्ठ आहार इत्यादि को ही ग्रहण करते हैं, विशेष रूप से तो गोरस अर्थात् घी, दूध,

दही, मक्खन इत्यादि, इक्षु की विकृति अर्थात् गुड़, शक्कर इत्यादि एवं वसा को, तैल को एवं नवीन अन्न को हेमंत और शिशिर में अभ्यास करते हुए व्यक्ति के श्लेष्मा का शरीर में संचय होता है, निश्चित रूप से शीतकाल में शीत वायु के (बाहरी त्वचा के) संस्पर्श से शरीर के अंदर रुकी हुई बलवान् जाठराग्नि बलवान् व्यक्तियों के हेमंत ऋतु में मात्रा से एवं द्रव्य से गुरु आहार इत्यादि को सहन करने में समर्थ होती है, किंतु आहार के पाक के परिणाम के प्रभाव से बल उत्पन्न करने वाले रस-रक्त आदि धातुओं की उत्पत्ति के साथ ही दोषस्वरूपक श्लेष्मा की भी उत्पत्ति और संचय होता है, इसलिए उसके दूर करने के लिए श्लेष्मक्षय करने वाले औषधात्मक द्रव्यों का सेवन शिशिर में और वसंत में करना चाहिए। आचार्य सुश्रुत निर्देश देते हैं कि संचय अवस्था में ही दोषों का यदि अपहरण कर दिया जाए (दूर कर दिया जाए) तो वे आगे की गतियों को प्राप्त नहीं करते हैं, वे और आगे की गतियों में तो और भी अधिक बलवान् हो जाते हैं (इसलिए संचयावस्था में ही उनको दूर करना उत्कृष्ट माना जाता है)।

**आयुर्वेदे तु दोषाणां संचय-प्रकोपप्रशमाः ऋतूनपेक्ष्यैव स्वप्रभावं प्रदर्शयन्ति। यदि चेज्जनाः ऋतुचर्यायामुपयुक्तानामायुर्वेदज्ञैः प्रोक्तानामौषधान्नविहाराणां सेवनं कुर्वन्ति तर्हि कालप्रभावाद्दोषविशेषस्य सञ्चयो न जायते, यतो हि तत्रैतादृशी व्यवस्था भवति यत्कालप्रभावजन्यस्य दोषस्यापि क्षपणम् ऋतुचर्यायाः परिपालनेनैव भवत्यत एव तस्य दोषस्य सञ्चयो न भवति। किन्तु सामान्यतयाऽधिसंख्यजनाः ऋतुचर्यापरिपालनक्रमे स्खलनं कुर्वन्त्येव। अतस्तैस्तु प्रत्येकस्मिनृतौ सञ्चीयमानं दोषमभिलक्ष्य विशिष्टानामौषधयोगानां प्रयोगः करणीयः। अनेन दोषाणां सञ्चय एव न जायते, कदाचिज्जातानामपि सञ्चयात्मकानां दोषाणामपहरणम्भवति, अत एव ते तूत्तराः गतीः न लभन्ते।**

आयुर्वेद में तो दोषों के संचय, प्रकोप और प्रशम ऋतु की अपेक्षा करके ही अपने प्रभाव को प्रदर्शित करते हैं। यदि लोग ऋतुचर्या में आयुर्वेदज्ञों के द्वारा कहे गए उपयुक्त औषध, अन्न और विहार का सेवन करते हैं तो काल के प्रभाव के दोषविशेष का संचय नहीं होता है, क्योंकि ऐसी व्यवस्था होती है कि काल के प्रभाव से उत्पन्न दोष का भी क्षपण ऋतुचर्या के परिपालन से ही हो जाता है, इसलिए उस दोष का संचय नहीं होता है, किंतु सामान्यतया अधिकांश लोग ऋतुचर्या के परिपालन के क्रम में लापरवाही करते ही हैं, इसलिए उनके द्वारा तो प्रत्येक ऋतु में संचित होते हुए दोष को ध्यान में रखकर विशिष्ट औषधियों का प्रयोग करना ही चाहिए इससे दोषों का संचय ही नहीं होता है कदाचित् यदि संचय हो भी गया है तो उन संचयात्मक दोषों का (औषधियों के सेवन से) अपहरण हो जाता है, इसलिए वे आगे की गतियों को प्राप्त नहीं करते हैं।

**शिशिरे तु कफस्य सञ्चितिर्भवत्यत एव कफघ्नानां द्रव्याणां सेवनङ्करणीयम्। केषाञ्चिद्योगानामुल्लेखोऽत्र क्रियते, सामान्यतया तेषामुपयोगः सुखावहो भवति शिशिरे। यथा-**

शिशिर ऋतु में तो कफ का संचय होता ही है, इसलिए कफ को नष्ट करने वाले द्रव्यों का सेवन करना चाहिए। यहाँ कुछ योगों का उल्लेख किया जा रहा है सामान्यतया शिशिर ऋतु में उनका उपयोग सुखकारक होता है जैसे-

**1. संशुष्कस्य हरिद्राचूर्णस्य प्रयोगो येन केनापि प्रकारेण नियमितरूपेण करणीयः। सांकेतिक-**

**रूपेणात्रैकस्य प्रयोगस्योल्लेखः क्रियते- चतुर्ग्रामपरिमितं हरिद्राचूर्णं गृहीत्वा चतुर्ष्वस्थिरहितेषु खर्जूरफलेषु सम्पूर्य चतुःसंख्याकानेव गोलकान् विधायैकस्मिन्नेव दिवसे तेषामाचूषणं करणीयम् एवं शिशिरे वसन्ते वा त्रिंशद्दिनानि यावदेषः प्रयोगः करणीयः। अनेन श्लेष्मणः क्षपणम्भवति प्रतिश्याय-स्वरभेदश्वासकासादिष्वपि सुखदो ह्येषः प्रयोगः।**

अच्छी तरह से सूखी हुई हल्दी के चूर्णका प्रयोग जिस किसी भी प्रकार से नियमित रूप से करना चाहिए। सांकेतिक रूप से यहाँ एक प्रयोग का उल्लेख किया जा रहा है- 4 ग्राम हरिद्रा के चूर्ण को लेकर 4 गुठली निकले हुए पिंडखर्जूर के फलों में भरकर चार ही गोले बना लें और एक ही दिन में उन चारों गोलकों का आचूषण करे, इस प्रकार के शिशिर में अथवा वसंत में 30 दिनों तक यह प्रयोग करना चाहिए इसमें श्लेष्मा का नाश हो जाता है, प्रतिश्याय, स्वरभेद, श्वास, कास इत्यादि रोगों में भी यह प्रयोग सुख देने वाला है।

**2. हरिद्रां चित्रकं वचां कुष्ठं पुष्करमूलञ्चैतानि पञ्चद्रव्याणि पृथक् पृथक् रूपेण 200-200 ग्रामपरिमितानि गृहीत्वा यवप्रमाणे सुकुट्य संम्मिश्र्य च सुष्ठु निधापयेत्। पुनश्च प्रतिदिनं 20 ग्रामपरिमितमेतत्क्काथद्रव्यं गृहीत्वा कषायकल्पना-विधिना क्वाथो विधेयः, प्रातः सायञ्चैषः नियमित-रूपेण सेवनीयो वर्तते शिशिरे।**

हरिद्रा, चित्रक वचा, कुष्ठ और पुष्करमूल इन पांच द्रव्यों को पृथक् पृथक् रूप से 200-200 ग्राम की मात्रा में लेकर जौ के प्रमाण में कूट कर इन सब को अच्छी तरह मिलाकर व्यवस्थित रूप से रख देना चाहिए और उसके बाद प्रतिदिन 20 ग्राम की मात्रा में इस क्वाथ-द्रव्य को लेकर कषाय-कल्पना की विधि से क्वाथ बनाना चाहिए, प्रात:काल और सायंकाल यह क्वाथ शिशिर ऋतु में नियमित रूप से सेवन के योग्य हैं।

**3. भार्गीमभयां सुरदारु च समानमात्रायां गृहीत्वा 20 ग्रामपरिमितेनानेन क्वाथद्रव्येण क्वाथं विधाय श्वासकासघ्नमेनं सुनिर्मितं कषायं स्वस्थः रुग्णो वा पिबेच्छिशिरे वसन्ते च।**

भार्गी और देवदारु इन तीनों को समान मात्रा में लेकर 20 ग्राम मात्रा वाले इस क्वाथ द्रव्य से क्वाथ बनाकर श्वासकास को नष्ट करने वाले अच्छी प्रकार से निर्मित इस कषाय को स्वस्थ व्यक्ति शिशिर और वसंत में पीवे।

**4. सुनिर्मितस्य च्यवनप्राशस्य हरिद्राखण्डस्य च नियमितरूपेण हेमन्ते शिशिरे वसन्तेऽपि च सेवनं श्रेयस्करम्भवति।**

अच्छी प्रकार से बनाए गये च्यवनप्राश का और हरिद्राखंड का नियमित रूप से हेमंत शिशिर और वसंत ऋतु में सेवन करना श्रेष्ठ होता है।

**5. आयुर्वेदे निर्दिष्टायाः शिशिरर्तुचर्यायाः परिपालनङ्करणीयम्।**

आयुर्वेद में बताई गई शिशिर चऋतुचर्या का परिपालन करना चाहिए।

**80, सेनापति हाउस के पीछे**
**प्रेमनगरम्, झोटवाड़ा, जयपुरम्**

## धनप्रकाशत्यागिनः स्वर्गारोहणम्




आजीवनं राष्ट्रसेवारतः शताब्दीयमायुः पूरयित्वा 103 तमं वर्षं स्पृष्टवान् श्रीधनप्रकाशत्यागी जनवरीमासे 24 दिनाङ्के दिवमारूढः। भारतीभवने सर्वैः स्नेहिजनैस्त-स्यान्तिमं दर्शनं कृत्वा तस्मै श्रद्धाञ्जलिरर्पितः।

संस्कृतसमाचाराः

# जोधपुरप्रान्ते प्रबोधनभाषाबोधनवर्गयोः आयोजनम्

❑ भुवनेशव्यासः, प्रान्तसहमन्त्री






संस्कृतभारती जोधपुरप्रान्तस्य प्रबोधनभाषा-बोधनवर्गयोः आयोजनं जोधपुरे 24/12/2019 तः 31/12/ 2019 पर्यन्तम् अभवत्। प्रबोधनवर्गे 18 शिक्षार्थिनः तथा च भाषाबोधनवर्गे 83 शिक्षार्थिनः भागं गृहीतवन्तः। वर्गयोः उद्घाटने मुख्यवक्ता डॉ. तगसिंहराजपुरोहितः क्षेत्रसंयोजकः संस्कृतभारती उ.प. क्षेत्रम् आसीत्। मुख्यातिथिः ताराचन्द्ररांकावतः तथा च अध्यक्षः वर्गाधिकारी डॉ. अपारबलभाटी सेवानिवृत्तः सहायकायुक्तः केन्द्रीयविद्यालय-संघटनम् उ.प. क्षेत्रम् आसीत्।

वर्गयोः शिक्षणप्रमुखः श्रीभुवनेशव्यासः प्रबन्धनप्रमुखः श्रीमहेशचन्द्रदाधीचः आसीत्।

वर्गयोः शिक्षकरूपेण ताराचन्द्रः, सवाईसिंहः, श्रवणसिंहः, मोतीलालः दिनेशगौडः, श्रवणबिश्नोई, जोगराजः श्रीमती अरुणाव्यासश्चासन्। प्रबन्धकरूपेण भेरारामः, अशोकः भवानीसिंहः, चन्द्रशेखरः माणकरामः चन्द्रारामः भंवरलालः, रैवतरामः घनश्यामः द्वारिकाप्रसादः किरणश्चासन्। वर्गयोः आहत्य 101 शिक्षार्थिनः 25 प्रबन्धकशिक्षकाश्चासन्। 30/12/2019 सायंकाले वर्गयोः समारोपकार्यक्रमे मुख्यवक्ता श्रीहुलासचन्दः क्षेत्रसङ्घटनमन्त्री उ.प. क्षेत्रम् आसीत्। मुख्यातिथिः प्रोफेसर् मनोजशर्मा आयुर्वेदविश्वविद्यालयजोधपुरम् आसीत्। अध्यक्षतां कृतवान् वर्गाधिकारी डॉ. अपारबलसिंहभाटी। 31/12/2019 दिने प्रातः दीक्षान्तभाषणं श्रीभुवनेशव्यासः प्रान्तसहमन्त्री कृतवान्।

प्रतिदिनं 1 वादनतः 4 वादनपर्यन्तम् एकं सामाजिकशिविरम् अपि आसीत् एतस्मिन् शिविरे 20 सामाजिकाः भागं गृहीतवन्तः। एतस्मिन् शिविरे शिक्षकरूपेण प्रान्तमन्त्री लीलाधरशर्मा आसीत्। वर्गे सांस्कृतिककार्यक्रमः अपि अभवत्। लघुनाटिकायां हर्षितः नमनः भंवरलालः अशोकश्च भागं गृहीतवन्तः। वर्गे सर्वे शिक्षकप्रबन्धकाः पत्राचारस्य ग्राहकत्वमपि स्वीकृतवन्तः।

**संस्कृतभारती, जोधपुरप्रान्तः**

संस्कृतसमाचाराः

## भारत्याः पाठकसम्मेलनं सम्पन्नम्

भारतीसंस्थापकस्य स्व. गिरिराजशास्त्रिमहोदयस्य जन्मशताब्दीमुपलक्ष्य भारतीयसंस्कृतप्रचारसंस्थानेन जनवरीमासस्य पंचमे दिनाङ्के भारतीपत्रिकायाः पाठकसम्मेलनम् आयोजितम्। जयपुरे भारतीभवने आयोजिते अस्मिन् सम्मेलने प्रायशः 250 पाठकाः गणमान्याः विद्वांसश्च उपस्थिताः आसन्। सम्मेलने मुख्यातिथिरूपेण समुपस्थितः भारतीसंरक्षकः रेवासा-पीठाधीश्वरः डॉ. राघवाचार्यमहोदयः उक्तवान् यत् संस्कृतं वैज्ञानिकी भाषा अस्ति। संस्कृतस्य संवर्धने भारतीपत्रिका अविस्मरणीयं योगदानं कृतवती। भारतीपत्रिका 1950 तमवर्षात् प्रतिमासं निरन्तरं प्रकाश्यते, अथ च अस्याः पाठकाः सम्पूर्णदेशे सन्ति। कार्यक्रमस्य विशिष्टातिथिः आसीत् राष्ट्रपतिसम्मानितः विद्वान् आयुर्वेदविश्वविद्यालयस्य कुलपतिचरः प्रो. बनवारीलालगौड़ः अध्यक्षतां कृतवान् प्रधानसम्पादकः राष्ट्रपतिसम्मानितः देवर्षिकलानाथशास्त्री कार्यक्रमे संस्थानस्य अध्यक्षः श्रीशंकरप्रसादशुक्लोऽपि मंचे उपस्थितः आसीत्। समारोहे भारतीपत्रिकायाः भूतपूर्वसम्पादकः पं. प्यारेमोहनशर्मा सम्मानपत्रेण श्रीफलेन रांकवेण च सम्मानितः। एतस्मिन्नवसरे भारतीपत्रिकायाः जनवरीमासस्य अङ्कस्य विमोचनमपि कृतमतिथिभिः। संस्थानस्य उपाध्यक्षः डॉ. नाथूलालसुमनः प्रास्ताविकं कृतवान्, अथ च मंत्री डॉ. सुधीरकुमारशर्मा धन्यवादज्ञापनं कृतवान्।

कार्यक्रमस्य सञ्चालनं सहायकसम्पादिका डॉ. स्नेहलताशर्मा कृतवती।

**-डॉ. सुधीरकुमारशर्मा**

## भारतीपत्रिका समर्पिता

भारतीपत्रिकायाः जनवरीमासस्य अङ्कः भारती-संरक्षकाय तारातरापीठाधीशाय महंतप्रतापपुरीमहाराजाय समर्पितः। भारतीयसंस्कृतप्रचारसंस्थानस्य सदस्यः सेवाभारतीसंस्थायाः क्षेत्रीयसंघटनमंत्री श्रीमूलचन्दसोनी, भारतीप्रबन्धसंपादकः श्रीसुदामाशर्मा, संस्थानस्य मंत्री डॉ. सुधीरकुमारशर्मा च भारतीभवने प्रतापपुरीमहाराजस्य स्वागतमपि कृतवन्तः।

**-डॉ. स्नेहलता**

## राजगङ्गाचेरिटेबलट्रस्टद्वारा कम्बलवितरणम्

दिसम्बरमासस्य 27 दिनाङ्के गलतापीठेन संचालित-वेदविद्यालयस्य छात्रेभ्यो जयपुरस्थस्य 'राजगङ्गा-चेरिटेबलट्रस्ट' इत्यस्य संस्थापिकया डॉ. राजेश्वरीभट्ट-महोदयया कम्बलाः वितरिताः। पीठाधीश्वरस्य अवधेशाचार्यमहोदयस्य, युवराजस्य, वेदाध्यापकस्य च राङ्कवप्रदानेन सम्मानोऽपि कृतः। अस्मिन्नवसरे संस्थायाः सहसचिवः प्रो. श्रीकृष्णशर्मा सदस्यौ प्रो. ताराशङ्करशर्मा डॉ. नाथूलालसुमनश्च उपस्थिताः आसन्। ज्ञातव्यमस्ति यत् डॉ. राजेश्वरीभट्टमहोदयया स्वपत्युः संस्कृतविदुषः डॉ. गङ्गाधरभट्टमहोदयस्य स्मृतौ संस्कृतसंवर्धनार्थं एतस्य न्यासस्य स्थापना कृता।

**-डॉ. नाथूलालसुमनः**

## बहूद्देशीयभवनस्य शिलान्यासः

राष्ट्रियसंस्कृतसंस्थानस्य जयपुरपरिसरे बहूद्देशीय-भवनस्य शिलान्याससमारोहे मुख्यातिथिरूपेण राजस्थान-स्य राज्यपालेन श्रीमता कलराजमिश्रमहोदयेन कथितं यत् संस्कृतस्य प्रभावः निरन्तरं वर्धते, संस्कृतस्य अध्ययनं विना कोऽपि भारतीयः विद्वान् च भवितुं न शक्नोति। संस्कृतभाषायाः अध्ययनेन एव जनाः भारतवर्षस्य वास्तविकं स्वरूपं ज्ञातुं शक्नुवन्ति। संस्कृतं भारतवर्षस्य सांस्कृतिकभाषा अस्ति।

**-डॉ. पवनव्यासः**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/405/2018-20



भारतीपाठकसम्मेलने दीपप्रज्वालनम्



भारतीपाठकसम्मेलने पत्रिकाविमोचनम्




भारतीपाठकसम्मेलने अतिथयः



भारतीपाठकसम्मेलने उपस्थिताः पाठकाः



प्रतापपुरीमहोदयाय भारतीसमर्पणम्



गलतापीठे कम्बलवितरणम्

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम्
अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा श्याम प्रिन्टर्स, किशनपोल बाजार, जयपुरम्
दूरभाषः 0141–4001974 पत्रसंकेतः– भारतीभवनम्, बी–15, न्यू कॉलोनी, जयपुरम्–302001
दूरभाषः 0141–2379014

प्रतिष्ठायाम्,